DPN 6698

Title : भागवत महापुराण (द्वितीय स्कन्ध)
BHĀGAWATA MAHĀPURĀṆA (DWITTYA SKANDHA)

Run. No. 7424

Cat. No.

Micro. No.

Subject पुराण Puruna

Religion : [✓ Hindu] / Bauddha

Language : [✓ Skt.] / New. / Nep. / Skt.- New. / Maith.- New. / New.- Nep. /

Size in cms. 47.5 × 10

Folios 43

Lines (in a page) 8/7 irregular

[✓ Compl.] / Incompl.

Chapt. / act /

Author / translator टीकाकार: श्रीधर स्वामि Shridhara Swami
commentator

[✓ Scribe] / donor - कृष्णादेव

Date: [✓ NS] / SS / VS / KS 782 (तेत्र नाग नग)

Ruler / place Krishna Dera

Script : [✓ New.] / Dev. / Bhuj. / Ran. /

Illus. :

Material : palmleaf / [✓ paper] / thyasaphu /

Condition : [✓ fine] / damaged by worms, rats, water /

Beginning, colophon, post-colophon :

Beg. श्री स्वस्ति ॥ ॐ गणेशाय नमः॥ ॥ द्वितीये तु दशाध्याये श्री भागवत भाषितः ।
उद्देश लक्षणोक्तिभ्यां संक्षेपेनोपवर्ण्यते ॥१॥

P.T.O.

ॐ नमो भगवते वासुदेवाय ॥ ॥ श्री शुक उवाच ॥
वरीयानेषते प्रश्नः कृतो लोकहितं नृप ॥
आत्मवित्संमतः पुंसां श्रोतव्यादिषूपर ॥

col. इति श्री भागवत टीकायां श्रीधरस्वामि विरचितायां भावार्थदीपिकायां द्वितीय
स्कन्धे दशमोध्यायः ॥
इति श्री भागवते महापुराणे द्वितीय स्कन्धे अष्टादश साहस्र्यां संहितायां
वैयासिक्यां द्वितीय ~~स्क~~न्धा दशमोध्यायः ॥ ॥ समाप्तश्चायं द्वितीयस्कन्धः ॥

य
Post-col - सम्वत् ७८२ ज्येष्ठ कृष्ण दशमी कुन्हु आदित्यवार थ्व कुन्हु अनया
स्वनिह्ल हंवताग्रह श्री देवदास देवया भिल दातिकाय श्रीकृष्णदेवन नाल
देशस चोंया जुरो दाजु श्री वलभद्रया नाला जुव वेलस जुरो ॥ नेत्र
नेत्र नाग नगे वर्षे ज्येष्ठेयमतिथौ सिते ।

अथ भागवत द्वितीयस्कन्ध प्रारम्भ

भाषा

अथद्वितीयस्कंधप्रारंभो २

१श्रीस्वस्ति॥ॐ गणेशाय नमः॥ ॥द्वितीये तु दशाध्याये श्रीभागवतमादितः। उद्देशलक्षणाक्रियां संक्षेपेनाथवर्ण्यते॥१॥ तत्र तु प्रथमेऽध्याये कीर्तनश्रवणादितः। स्थविष्ठे भगवद्रूपे मनसो धारणोच्यते॥२॥ यन्नामकीर्तनादीनां तथा ध्या-

भा।द्वि॥ नादिसत्फलं। तन्निर्णयसमानंदं हरिं तमनुसंस्मर॥३॥ उक्तः पूर्वं नृपा[illegible]ह्वानः सत्प्रसंगः शुकागमः। राज्ञा पृष्टं तु यत्तत्र तथाह शुकसन्मुनिः॥४॥ राज्ञः प्रश्नमभिनन्दति वरीयानिति॥ त्वया पुंसां श्रोतव्यादिषु मध्ये

यः परः श्रेष्ठः सोऽयं प्रश्नः कृतः एष वरीयान्, यतो लोकहितमतः। लोकहितत्वमाह, आत्मविदां मुक्तानाञ्च संमतो यतः तत्र तावत्स्वाभाविकक्रियाणामनर्थहेतुत्वं वदन्॥ ॥२॥ [illegible]

श्री १ १ॐ नमो भगवते वासुदेवाय॥ ॥श्रीशुक उवाच॥ वरीयानेष ते प्रश्नः कृतो लोकहितं नृप। आत्मवित्संमतः पुंसां श्रोतव्यादिषु यः परः॥१॥ श्रोतव्यादीनि राजेन्द्र नृणां सन्ति ॥१॥

सहस्रशः॥ अपश्यतामात्मतत्त्वं गृहेषु गृहमेधिनां॥२॥ निद्रया ह्रियते नक्तं व्यवायेन च वा वयः॥ दिवा चार्थेहया राजन् कुटुम्बभरणेन वा॥३॥ ॥राम॥

बुद्धिपक्षविपर्ययमित्यस्याहत्वमाह॥ श्रोतव्यादीनीति द्विभिः॥ गृहेषु सक्तानां अत एव गृहमेधिनां तत्रायश्च स्तनायतनाक्षी मध्यमिर्दिं स्वार्थशो व्यर्थ एवायुर्यायाद्भवतीत्याह॥ नक्तमायुर्यद्वयः आयुः तन्निद्रया

व्यवायेन च वा ह्रियते। दिवा आयुर्यद्वयः तत् अर्थेहया अर्थार्थमुद्यमेन सिद्धेऽर्थे कुटुम्बपोषणेन वा चकाराद्वनुकसमुच्चयार्थौ॥३॥ कद्रुनी पक्षिणी त्रु द्वौ उद्यत्क्ष्मीसमाहनी। पश्चः सेनासहस्रस्य

हविर्तीव घस्तचर्कधा॥ ॥गुरो॥

ननु तस्य तत्कुटुम्बार्थं कथमायुर्व्यर्थं कर्यात् इत्याह। देहादिषु आत्मनः सैन्य मृपनिकायेषु असत्स्वपि मिथ्याभूतेष्वपि प्रमत्तः आसक्तः सर्वांपितादि दृष्टान्तेन नाशं पश्यन्नपि नानुसंधत्ते एवं विपर्ययप्रश्नस्य लभमुक्त्वा

श्रोतव्यादिप्रश्नस्य उत्तरमाह। तस्मादिति हे भारत तस्मात् सर्वे प्रत्यस्तं वासिनीति अभयमाहरणवानिति॥ सोऽर्थः श्रोतव्य इत्यादि व्यवस्थातव्यं हरिविनितिवेद्य हरिविद्यां अतः पर्यैमा कामिश्चता। अतः परं अत्यन्तं कुर्यान्नेत्याह एतावानेव जन्म

लाभः परं इत्याह एतावानिति सांख्यादिभिः साधनैः अन्ते नारायणस्मृतिरेव जन्मलाभः। लाभत्वं व्याख्यति सांख्यमात्मनात्मविवेकः। योगोऽष्टांगः। अन्ते तु स्मृतिः यथा लाभः। नान्य हि मावर्त्तमानत्वं हत्यर्थः॥ तत्र सदाचारः प्रमा-

देहापत्यकलत्रादिष्वात्मसैन्येष्वसत्स्वपि। तेषां प्रमत्तो निधनं पश्यन्नपि न पश्यति॥४॥ तस्माद्भारत सर्वात्मा भगवानीश्वरो हरिः। श्रोतव्यः कीर्तितव्यश्च स्मर्तव्यश्चेच्छताभयं॥५॥ एतावान् सांख्य-

योगाभ्यां स्वधर्मपरिनिष्ठया। जन्मलाभः परः पुंसामन्ते नारायणस्मृतिः॥६॥ प्रायेण मुनयो राजन् निवृत्ता विधिनिषेधतः। नैर्गुण्यस्था रमन्ते स्म गुणानुकथने हरेः॥७॥ इदं भागवतं नाम पुराणं

ब्रह्मसम्मितं। अधीतवान्द्वापरादौ पितुर्द्वैपायनादहं॥८॥ परिनिष्ठितोऽपि नैर्गुण्य उत्तमश्लोकलीलया। गृहीतचेता राजर्षे आख्यानं यदधीतवान्॥९॥

णयति। प्रायेणेति विधिनिषेधतः विधिनिषेधार्थांन्निवृत्ता नैर्गुण्ये ब्रह्मणि स्थिताः। अपि स्वयमपि अहं। किमिदमपूर्वं कथयसि। सत्यं अत्यपूर्वमेवदमित्याह। इदं भगवत् श्रीकृष्णनामैकप्रधानं पुराणं ब्रह्मसम्मितं सर्ववेदतु-

ल्यं यत्तद् ब्रह्मसम्यक् मितं येन कृतत्वाद्वापर येन आह। अधीतवानिति। इहोत्तमश्लोकः आकृष्टचित्तः सिद्धस्यैव कृता व्याख्याना उपदिष्टः तदाहपरिनिष्ठितोऽपीति॥ गृहीतचेताः आकृष्टचित्तः॥ ॥गुरो॥

भाद्वि महापूरुषिकस्तदीयः। यस्य यस्मिन् श्रद्दधतां कुर्वतां सती अहैतुकी॥१०॥ साधकानां सिद्धानां च नामकीर्तनमेव परमं साधनं फलं चेत्याह एतदिति इच्छतां कामिनां तत्तत्फलसाधनमेतदेव निर्विद्यमानानां मुमुक्षूणां मोक्ष
साधनमेतदेव॥ योगिनां ज्ञानिनां फलं चैतदेव निर्णीतं। नात्र प्रमाणं वक्तव्यमित्यर्थः॥११॥ अल्पमवायुरवशिष्टं किं मम साधयिष्यतीति। मा शुच इत्याह किमिति त्रिभिः। प्रमत्तस्य अज्ञातैर्हायनैर्वर्षैर्बहुभिरिह तथा यातीति
ज्ञातं यतः ज्ञातेन घटते यतते कश्चापि॥१२॥ खट्वाङ्ग इति ज्ञात्वा देवानां उपयुक्ता तत्सद्भिर्देवैर्वरं वृणीष्वेत्युक्तोऽनन्तरं प्रथमं ममायुः कथयतेति॥ तदा देवैरुक्तं तव मुहूर्तमात्रमस्तीति॥ तदा मुक्तिगी ध्रुविमा
2 तदहं तेऽभिधास्यामि महापौरुषिको भवान्। यस्य श्रद्दधतामाशु स्यान्मुकुन्दे मतिः सती॥१०॥ एतन्निर्विद्यमानानामिच्छतामकुतोभयम्। योगिनां नृप निर्णीतं हरेर्नामानुकीर्तनम्॥११॥ किं प्रमत्त
स्य बहुभिः परोक्षैर्हायनैरिह। वरं मुहूर्तं विदितं घटते श्रेयसे यतः॥१२॥ खट्वाङ्गो नाम राजर्षिर्ज्ञात्वेयत्तामिहायुषः। मुहूर्तात्सर्वमुत्सृज्य गतवानभयं हरिम्॥१३॥ तवाप्येतर्हि कौरव्य स
प्ताहं जीवितावधिः। उपकल्पय तत्सर्वं तावद्यत्साम्परायिकम्॥१४॥ अन्तकाले तु पुरुष आगते गतसाध्वसः। छिन्द्यादसङ्गशस्त्रेण स्पृहां देहेऽनु ये च तम्॥१५॥
॥
नन्वेवमागते कथं कर्तव्यमित्याशङ्क्याह सौख्यार्थिकाः कर्मकर्तारः पृथग्॥१३॥ तवाप्युत इदानीमपि तावज्जीवितावधिः कालः। साम्परायिकं पारलौकिकं साधनं संपादय॥१४॥ तदाह देहेऽस्य तावद
ह अन्तकाले गतसाध्वसः सन् त्यक्तभयः। असङ्गो नाम अनासक्तिः तदेव शस्त्रं तेन देहमनु ये पुत्रादयस्तद्विषयस्पृहां छिन्द्यात्॥ (त्वमेवमां २ मूल॥ ॥श्रीकृष्णाय नमः॥ॐ॥

किञ्च गृहात्प्रव्रजितो निर्गतः। स्थितस्य पुनर्नव्यासक्तिसंभावना॥ तत्र साङ्गयोगमाह धीर इति ब्रह्मचर्यादियमायत्तबुद्धिः पुण्यतीर्थेति स्नानादिनियमोपलक्षणं॥ आसनमाह शुचाविति विविक्ते एकान्ते विधिवत् कुशाजिनचे
लो मे निश्चिते॥१६॥ अथ गर्भप्राणायामं कुर्वन् ध्यायेदित्याह॥ त्रिवृत् त्रिमात्रकाकारादिरूपं ब्रह्माक्षरं प्रणवं मनसाऽभ्यसेत्॥ आवर्तयेत् मनसा इन्द्रियप्रत्याहारं वदन् प्राणायामेन मनोनियमनमाह॥ मनो यच्छेत् ब्रह्मबीजं प्रणवम् अवि
स्मरन्नेव जितश्वासः सन्॥१७॥ प्रत्याहारमाह नियच्छेदिति अक्षान् इन्द्रियाणि निश्चयात्मिका बुद्धिः सा सारथिर्यस्य सः॥ धारणामाह मन इति पुनश्च कर्मभिः। तत्र रागादिना विक्षिप्तं शुभार्थे भगवद्रूपे॥१८॥ ध्यानमाह
गृहात्प्रव्रजितो धीरः पुण्यतीर्थजलाप्लुतः। शुचौ विविक्त आसीनो विधिवत्कल्पितासने॥१६॥ अभ्यसेन्मनसा शुद्धं त्रिवृद्ब्रह्माक्षरं परम्। मनो यच्छेज्जितश्वासो ब्रह्मबीजमविस्मरन्॥१७॥ नियच्छे
द्विषयेभ्योऽक्षान्मनसा बुद्धिसारथिः। मनः कर्मभिराक्षिप्तं शुभार्थे धारयेद्धिया॥१८॥ तत्रैकावयवं ध्यायेदव्युच्छिन्नेन चेतसा। मनो निर्विषयं युक्त्वा ततः किंचन न स्मरेत्॥१९॥ पदं तत्परमं
विष्णोर्मनो यत्र प्रसीदति॥ रजस्तमोभ्यामाक्षिप्तं विमूढं मन आत्मनः॥२०॥ यच्छेद्धारणया धीरो हन्ति या तत्कृतं मलं॥
तत्रेति। एकैकावयवं ध्यायेत् अव्युच्छिन्नेन मनोयुक्तः समाधाय छिन्नीरतामनसि। ततः परमानन्दमनाकारं कृत्वेत्यर्थः॥ प्रसीदति उपशाम्यति॥१९॥ शुभाश्रयस्य न च यदि विक्षेपः स्यात् तदा भगवच्छ्रीरूपादि कुर्यादित्याह॥ रजसा
आक्षिप्तं तमसा विमूढं। स्वीयं मनो नियच्छेत्। तत्कृतं रजस्तमःकृतं मलं॥२०॥

॥१॥ ।श।२
यतः यस्यां क्रियमाणायां तद्दर्शनात्मकं । आश्रयं विषयं पश्यतः ॥ न एव प्रीतिर्भवति यथा येन प्रकारेण यादृशी तिष्ठति कर्तव्यता विषयक दिलक्षणा प्रश्नः ॥२॥ यावत्तस्या रूपं जितासन स्तुति । विषयमाह स्थूल स्तुति साधन
॥३॥ विशेषो विराड्देहः भूमिस्थूलानामपि स्थूलतया सत्कार्यमात्र ॥४॥ अस्य चायं लक्षणलेन विषयत्वं वस्तुतस्तु विराड् जीवति यत्र भगवान् विषयत्वाद् ॥ ॥अण्डकोशे कर्तव्यमिति निक एवं पृथिव्या चरणं कान्तः अधः आवाङ्का का

यस्यां संधार्यमाणायां योगिनो भक्तिलक्षणः । आशु संपद्यते योग आश्रयं भद्रमीक्षतः ॥१॥ ॥राजोवाच॥ यथा संधार्यते ब्रह्मन् धारणा यत्र सम्मता । यादृशी वा हरेदाशु पुरुषस्य मनोमलम् ॥२॥ श्रीशुक
उवाच ॥ जितासनो जितश्वासो जितसङ्गो जितेन्द्रियः । स्थूले भगवतो रूपे मनः संधारयेद्धिया ॥३॥ विशेषस्तस्य देहोऽयं स्थविष्ठश्च स्थवीयसाम् । यत्रेदं दृश्यते विश्वं भूतं भव्यं भवच्च सत् ॥४॥ अण्डकोशे श
रीरेऽस्मिन् सप्तावरणसंयुते । वैराजः पुरुषो योऽसौ भगवान् धारणाश्रयः ॥५॥ पातालमेतस्य हि पादमूलं पठन्ति पार्ष्णिप्रपदे रसातलम् । महातलं विश्वसृजोऽथ गुल्फौ तलातलं वै पुरुषस्य जङ्घे ॥६॥ ३
द्वे जानुनी सुतलं विश्वमूर्तेरूरुद्वयं वितलं चातलं च । महीतलं तज्जघनं महीपते नभस्तलं नाभिसरो गृणन्ति ॥७॥
लाहकाय महद्भूतानामिति सप्त ॥५॥ विराड्देहं तत्रैव तदन्तर्यामि स महतो माया यायासनं कर्तव्यमिति त्यागे यत्र ह ॥ पातालं पादमूलं पादस्याधोभागः । पातालादीनां तदवयवता विधीयते ॥ पातालादीन्यतलानि । अधः
स्थलादयस्य सप्त भुवि च वर्णयन्ति पठन्ति । रसातलादि । महातलादि गुल्फप्रपद पादस्याग्रमधस्तु पार्श्वशोभे ॥ ॥द्वे जानुनी तस्य सुधारूपं वितलं ... अतलमिति क्रमेण ॥ नाभिरेव सरः ॥७॥ ॥श्री॥

अतिवनीकं अत्तिर्यम् स्वर्गे महर्लोकं ग्रीवेति गृणन्ति । तपोलोकं वराटिं ललाटं सत्यलोकं ॥२८॥ इन्द्रादयो बाहवः । तत्समयगवीवहनु तदाहव उस्रा देवाः ॥ दिशः कर्णौ आदि अधिष्ठात्री देवताः कर्णौ अतस्या
धिष्ठाने शब्दस्तु ग्राह्यविषयः समस्य अयमिन्द्रियम् । एवं नासिकादि षपि नासत्यदस्रौ अश्विनौ नासे नासापुटे ॥२९॥ द्यौः अक्षिणी अक्षिणी नेत्रगोलके । चक्षुरिन्द्रियं पतङ्गः सूर्यः । अहनी रात्र्यहनी पक्ष्मणी
उरःस्थलं ज्योतिरनीकमस्य ग्रीवा महर्वदनं वै जनोऽस्य । तपो वराटीं विदुरादिपुंसः सत्यं तु शीर्षाणि सहस्रशीर्ष्णः ॥२८॥ इन्द्रादयो बाहव आहुरुस्राः कर्णौ दिशः श्रोत्रममुष्य शब्दः ॥
नासत्यदस्रौ परमस्य नासे घ्राणोऽस्य गन्धो मुखमग्निरिद्धः ॥२९॥ द्यौरक्षिणी चक्षुरभूत्पतङ्गः पक्ष्माणि विष्णोरहनी उभे च । तद्भ्रूविजृम्भः परमेष्ठिधिष्ण्यमापोऽस्य तालू रस एव जिह्वा ॥३०॥
छन्दांस्यनन्तस्य शिरो गृणन्ति दंष्ट्रा यमः स्नेहकला द्विजानि । हासो जनोन्मादकरी च माया दुरन्तसर्गो यदपाङ्गमोक्षः ॥३१॥ व्रीडोत्तरौष्ठोऽधर एव लोभो धर्मः स्तनोऽधर्मपथोऽस्य पृष्ठम् ॥
कस्तस्य मेढ्रं वृषणौ च मित्रौ कुक्षिः समुद्रा गिरयोऽस्थिसङ्घाः ॥३२॥ नद्योऽस्य नाड्योऽथ तनूरुहाणि महीरुहा विश्वतनोर्नृपेन्द्र । अनन्तवीर्यः श्वसितं मातरिश्वा गतिर्वयः कर्म गुणप्रवाहः ॥३३॥
धिष्ण्यं उत्कृष्टपदं तालु अधिष्ठाने जिह्वा रसे इन्द्रियं ॥३०॥ छन्दांसि वेदाः शिरांसि ब्रह्मरन्ध्रं स्नेहकलाः प्रेमादि स्नेहलेशाः द्विजा दन्ताः ॥ यच्च मायायाः सर्गः स्थितिः यस्य कटाक्षः ॥३१॥ अधर्ममार्गस्य
पृष्ठभागः ॥ कः प्रजापतिः ॥ मित्रौ मित्रावरुणौ ॥ अनन्तवीर्यं यस्य सः ॥ वयः कालः ॥ तस्य गमनं गुणप्रवाहः संसारिणां संसारकर्म तस्य क्रीडा ॥३३॥
॥३४॥

स्तनः॥ विराजः सूर्यकं चक्षुर्नेत्रं सः प्रसिद्धः चन्द्रमाः तदीयं मनः सर्वविकाराणां कारणं च आश्रयश्च ॥३४॥ विज्ञानशक्तिं विदुः महिं महत्तत्वं अन्तःकरणं अहंकारं गिरित्रं रुद्रं गर्दभादयो वायाद्यन्त्राः अश्वतरी॥३५॥
वयांसि पक्षिणः तस्य व्याकरणं नानामरूपव्याकरणवाणीति शब्दकर्मयनेषूर्ध्वं यथा द्रुः यनस्फुलिंगाः हंसाः शुकादयः विचित्रतामाः मयूराश्च चित्रितायन सा यद्वक्तिविभासयतीति॥ मनुः स्वायंभुवः मनीषा बुद्धिः मनुजः पूरुषः

ईशस्य केशान् विदुरम्बुवाहान् वासस्तु सन्ध्यां कुरुवर्य भूम्नः। अव्यक्तमाहुर्हृदयं मनश्च स चन्द्रमाः सर्वविकारकोशः॥३४॥ विज्ञानशक्तिं महिमामनन्ति सर्वात्मनान्तःकरणं गिरित्रं॥ अश्वाश्व-
तर्युष्ट्रगजा नखानि सर्वे मृगाः पशवः श्रोणिदेशे॥३५॥ वयांसि तद्व्याकरणं विचित्रं मनुर्मनीषा मनुजो निवासः॥ गन्धर्वविद्याधरचारणाप्सराः स्वरस्मृतीरसुरानीकवीर्यः॥३६॥ ब्रह्माननं क्षत्रभु- ४
जो महात्मा विडूरुरङ्घ्रिश्रितकृष्णवर्णः॥ नानाभिधाभीज्यगणोपपन्नो द्रव्यात्मकः कर्म वितानयोगः॥३७॥ ॥टीका॥ निवासः आश्रयः पूर्ववत् वा विस्फुरात्मनि भूताः गन्धर्वादीनां द्वंद्वे

कः गन्धर्वादयः स्वरस्मृतिः षड्जादिस्वरस्मरणयन्त्रस्थाः असुरीकवीर्यं यस्य स्मृति स्वरानीकवीर्य इति पाठे गन्धर्वादयः स्वराः असुरसमूहः अष्टः प्रज्ञादः स्मृतिरस्येति॥३६॥ ब्रह्मा विप्रस्तस्याननं
मुखं क्षत्रं क्षत्रियास्तु भुजा यस्य विड्वैश्यः ऊरुर्यस्य अङ्घ्रिश्रितकृष्णवर्णः शूद्रो यस्य नानाभिधानामानि येषां ते च ते ईज्यागणाः देवाश्च तैरुपपन्नो यज्ञः द्रव्यात्मको हविः सद्यस्त वितानयागः
यज्ञप्रयोगः तस्य कर्मक्रियाः आवश्यकानुष्ठानरूपमित्यर्थः॥३७॥ ॥राम॥राम॥ कृष्ण॥ कृष्ण॥ ॥हरि॥हरि॥ ॥राम॥राम॥ ॥रामराम भक्ति राम भक्ति न नम राम मनानम ॥ सत्यं॥ ॥

ईयान् एतावान् सन्निवेशः अवयवस्थानं अस्मिन्स्थविष्ठे मनः संधार्यं यत्स्वबुद्ध्या यतो व्यतिरिक्तं किंचिन्नास्तिस्मिन्॥३८॥ ननु विलसत्सर्वार्थविषयानुदेहजीवस्य धारणमहदनायासेन मुक्तिः॥ तत्र उक्तजीवात्मा
प्रविलाप्य स एव ध्येय इति निर्दिशयति। स इति। सर्वधीवृत्तिभिरनुभूतं सर्वं येन स एक एव सर्वक्रिय आत्मा न भवतु मसङ्गात् अनुपपत्तिरकोनेन सङ्गतः यतः आसंगभक्त्या आत्मनः संसारो भवति। एकस्यानेकदिक्वि-
षेः स्वप्नजनानामीक्षिता यथा इति स्वप्नदृष्टिकदाचित् बहून्देहानुपकल्प्य जीवरूपदिद्रियेभ्यः सर्वेभ्यः अपि तद्दृशः स्वप्नवस्तु विषयानिक्षितावत्व॥३९॥ ॥इति द्वितीयस्कन्धे भावार्थदीपिकायां प्र

ईयानसावीश्वरविग्रहस्य यः सन्निवेशः कथितो मया ते। सन्धार्यतेस्मिन् वपुषि स्थविष्ठे मनः स्वबुद्ध्या न यतोस्ति किंचित्॥३८॥ स सर्वधीवृत्त्यनुभूतसर्व आत्मा यथा स्वप्नजनेक्षितैकः॥
तं सत्यमानन्दनिधिं भजेत नान्यत्र सज्जेद्यत आत्मपातः॥३९॥ ॥इति श्रीभागवते महापुराणे द्वितीयस्कन्धे महापुरुषसंस्थानुवर्णने प्रथमोध्यायः॥ ॥श्रीशुक उवाच॥ एवं पुरा
धारणयात्मयोनिर्नष्टां स्मृतिं प्रत्यवरुध्य तुष्टात्। तथा ससर्जेदममोघदृष्टिर्यथाप्ययात्प्राग्व्यवसायबुद्धिः॥१॥ ॥ ॥

थमोध्यायः॥१॥ ॥द्वितीये तु ततः स्थूलधारणानिर्जितमनः। सर्वसाक्षिविसर्गेण विष्णोर्धर्मा निरूप्यते॥ इच्छालीयन रूपैर्वमुक्तावेवावधारणा॥ ईश्वरात्मतत्त्वात्मा सर्वाकिर्यासिध्यवत्वा तत्रतावत्पूर्व-
र्वोक्तिधारणया। अवान्तरफलमाह। एवमिति धारणया तुष्टात् हरेः पुरा प्रलयसमये नष्टामपि स्मृतिं प्रत्यवरुध्य लब्ध्वा अप्ययात् प्राग्यथासीत्तथा ससर्ज व्यवसायात्मिका बुद्धिर्यस्य अमोघा दृष्टि-
र्यस्येति॥ अतश्च धारणया विश्वसृष्टिसामर्थ्यं भवति॥१॥

उपासनात्मकादपि विविक्तस्य शुद्धात्मध्यानाभ्यासमधिकारः। अतो वेदार्थं सर्वकर्मफलानि निन्दति। [illegible] मयं ब्रह्मपदः तस्यैवमयमन्त्रः कर्मफलवासनप्रकाशः कोऽसौ। अर्थं नूनं येन स्वर्गादिनामरिः यत्नसाध
कस्याधीश्वरोऽयमिति। तत्र दिष्ट्याकथानीतियत। अपार्थत्वमेवाह तत्रमायामयं पथिस्वरूपमिति वासनया गयानः स्वयानुपश्यन् स्व यदि ज्ञानं अर्थानुनविन्दति। तत्र ज्ञानं कर्माकापि निःस्वर्गसुखं न लभत [illegible]॥२॥ नहि
सर्वथा कर्मफलस्य [illegible] स एव वदन्त्यात् स्यादि त्यागं करोति॥ अतः कविर्नाम मायामयं [illegible] यावतार्थेन [illegible] तथा स्यात्। अथ मनः तावन्मात्र यतनागमः व्यवसायबुद्धिर्नर्दिस्वरूपमिति निश्चयवान्॥
भवदस्य हि ब्रह्मण एव मयमन्त्रः यन्नाम निश्चयति धीवयार्थेः परिश्रमं कृत्वा न विन्दत्यर्थं। मायामयवासनया गयानः॥१॥ अतः कविर्नामस्य यावदर्थः स्याद्व्यवसायबुद्धिः॥ सिद्धः
न्यथार्थनियतात्मा हृदयः यद्विश्रमन्त समीक्षमाणः॥३॥ सर्वात्मेति किं कथ्यते प्रयासे [illegible] सिद्धः अपवर्गः [illegible]॥ सत्य ज्ञाने किं पूर्वमनुयात्ता दिश्य स्वलोकेषु सति किं द्वन्द्वं॥४॥ वीत
[illegible] पथिनस्त किं दिग्गति [illegible] नेवांछिया [illegible] सविलो यत्नु यत्न। नु ज्ञा गुरुः किमतः [illegible] नायपन्नान् कस्मात्कृतं किं कथया धनदर्मदान्धान्॥७॥ ॥नाम॥
तथापि तत्र [illegible] अन्यथैव सिद्धसति तद्यपत्तं परिश्रमं पश्यन् नयात॥३॥ अन्यथा सिद्धिमाह [illegible]। सत्यामिति कथ्यते गयायाभ्यन्तः सिद्धवाहोऽस्ति उपवर्ग [illegible] मनु [illegible] अन्नपाथा [illegible]
पाज्ञता॥४॥ ननु दिक्षु सहावानामनग्नत्वमेव। वल्कलमन्नं नार्यं वासस्थानं च। या [illegible] विना कथं [illegible] तत्राह॥ चीराणि चर्कृत्वकानि। पथानुविश्रान्ति पुण्यानि फलादिरीर्थ [illegible]। ननु कदाचिद् [illegible] किं
कार्यं तत्राह। सृजति हरिः उपयत्नान् [illegible] किं त्वज्ञवति नत्वरति [illegible] धननयोऽहर्मदिः गतान्धान्॥७॥
॥

तदाननर्थिकर्तृत्वं हृदि शुसयहश्लाह॥ एवं विविक्तः सन् गतरुज्ञ। रजनीय वैराग्यवः स्वविकल्पत एव सिद्धः यतः आत्मा ज्ञान एव प्रियः। प्रियस्यैव सर्वासुखरूपैव। अर्थं स्वसत्यः ननु नात्मनमिथ्यां रागवान् रजनीयगुणस्य अनन्त
थ। नित्यः य एवं कृत्त [illegible] रज्ञ। नियतार्थः निश्चयस्य स्वरूपे तदनुरागानन्देन निर्वृतः संतृप्तिः। स्वतः सुखात्मत्वं दर्शितं। किं च यत्र यस्मिन् रज्ञानेस्ति संसारहेतौ न विद्या याडपरमानात्म रुचति॥५॥ एतदेवान्यविशिन्दयातीद्दृश्यति॥ ॥
कथ्यति। नान्यथाराग्यत्र यस्य हृद्यनन्तविकीर्णमवभ्रमनाद्दस्यपश्यन् कर्मजन्यानु विना। यथा पशुसदयोनामितिकृतः अन्यत्र विषयविकीर्णः नामकृत्यात्। तया विकल्पया वेदात्स्वयंपतिते। तत्र स्वकर्मजानू अध्यात्मिकादिक्रमानुसवम।
एवं सवि कल्पत एव सिद्धः आत्मा प्रियार्थरागवानननन्दतः विद्धि नियतार्थरज्ञ। संसारहृदयमभ्ययच॥६॥ कस्याविनाद्दापयानु विकल्पमूलायभ्रानसमीनामयुग्मात्॥ पथ्यनुमनीयमितिवेतन
थ्या स्वकर्मजानुयविनायानुरागाणी॥७॥ कविस्त्वदहतुकर्मदयावकाश प्रादगमार्थपुत्रयवसनं। यदु [illegible] तथारूपि स्वगतार्थं [illegible] यामस्य निः॥८॥ अस्तत्रवर्द्धन विनायतं [illegible] कदम्बकिः
लोकपिगवासस्ते। लसन्महाञ्च तदिवभयाकदं स्वनमहंमन्तकिनीप्रकुलं॥२॥
नेजनयश्चन्। वैनवधीयमहावक्तानदा नरसत्यवा संसृतिर्वेतित्रणी॥८॥ नामेवभावनं संविशद्यनाक्षाह॥ कविदितियद्धि स्वदनस्यान्कः मध्ययहृदयं तथायावकाश स्मिन्नुवसनं प्रादगहत्व्य शुश्रूषाद्विलानः सएवमजभ्रमा
नयस्यामिसवेदयं हृदयपविमानेतमायवस्थिति। कदंयन्न। नथास्वर्त। नलिनं पद्मं तद्युसदं आयतदीर्घं द्वीकरो यस्य। कदंबकसुमस्यकिंजल्काः केसरा। तद्वत्पिंग गवीतवाससी यस्य लसन्तिमहान्तो नियम्यानि स्वर्द्ध
मयान्यकानि यस्य स्वनं किंच मनिमहान्तो नि चतन्मया निष्कोऽष्ट कुण्डलानि यस्य॥२॥

[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

[illegible]
[illegible]

उक्तिदर्शितकर्णिकायां हृत्पङ्कजस्य कर्णिकैव आलयः स्थानं तस्मिन् या निवृत्याक्षिप्तं कृतम् आह ॥ यत्रमिति । यद्यस्मात् भूतत् आत्मध्यानविकर्म नतिनतीत्येवम् उत्स्रष्टुमिच्छवो दौरात्म्यं देहाद्यात्मत्वं विसृज्य प्र
हृत्पद्मस्य श्रीविष्णोः पदं । यद्यत्पदं कालेकाले हृदाद्युपगुह्य आश्रित्य नान्यस्मिन् सौहृदं येषां तथाभूताः सन्तः स्वदेहे पूर्वं पदं अर्हं एवं पदं सर्वतः ॥ अत्र मामनन्तीत्यन्वयः ॥१८॥ तस्मादिदं ब्रह्म स्थेन यावत्तिष्ठ निर्गुणं निरूपयन्ति
पुण्यदेन यदि प्रयास्यन् इति वक्ष्यमाणं सर्वसाधारणमुक्तः तमाह । विज्ञायतेनेति । विज्ञानेन दृग्वीर्येण तत्त्वज्ञानेन दृक् ज्ञानं तस्य वीर्यं बलं तेन सुरन्धिताः विदग्धिताः आशयो वासना यस्य सः । तस्य देहत्यागप्रकारमा

परं पदं वैष्णवमामनन्ति तद् यन्नेतिनेतीत्यतदुत्सिसृक्षवः । विसृज्य दौरात्म्यमनन्यसौहृदा हृदोपगुह्यार्हपदं पदे पदे ॥१८॥ इत्थं मुनिस्तूपरमेद्व्यवस्थितो विज्ञानदृग्वीर्यसुरन्धिताशयः । स्वपार्ष्णिना-
पीड्य गुदं ततोऽनिलं स्थानेषु षट्सून्नमयेज्जितक्लमः ॥१९॥ नाभ्यां स्थितं हृद्यधिरोप्य तस्मादुदानगत्योरसि तं नयेन्मुनिः । ततोऽनुसन्धाय धिया मनस्वी स्वतालुमूलं शनकैर्नयेत ॥२०॥ तस्माद्भ्रुवोरन्तरमुन्न- १
येत निरुद्धसप्तायतनोऽनपेक्षः । स्थित्वा मुहूर्तार्द्धमकुण्ठदृष्टिर्निर्भिद्य मूर्द्धन् विसृजेत्परं गतः ॥२१॥

॥टीका॥ स्वपार्ष्णिना पादमूलेन गुदं मूलाधारं आपीड्य ततोऽनिलं उन्न-
मयन् ऊर्ध्वं नयन् जितक्लमः आसनादिना जितश्रमः सन् षट्सु स्थानेषु नाभ्यादिषु ॥१९॥ नाभ्यामिति । पूरकस्थितं हृदि अनाहतचक्रे अधिरोप्य ॥ उरसि कण्ठदेशादधस्तात् स्थितं विशुद्धिचक्रे । मनस्वी जितचित्तः । स्वतालुमूलं तालुमूलं तदेव चक्र
मग्रदर्शनतावकम्भ्यासमनसीत्यस्य बलात् अनुसन्धाय नयेत् ॥२०॥ तस्माद्भ्रुवोरन्तरं आज्ञाचक्रं । निरुद्धानि श्रोत्र नेत्र नासिका मुखरूपाणि सप्त आयतनानि छिद्राणि येन सः । अनपेक्षः परं गतः सन् मूर्द्धन् मूर्द्धनि ब्रह्मरन्ध्रं निर्भि-
द्य देहमिन्द्रियाणि च विसृजेत् ॥२१॥

यदि प्रयास्यन् पारमेष्ठ्यं पदं प्रयास्यन् भवति । वैहायसानां खेचराणां सिद्धानां यद्विहारस्थानं तदप्यन्तर्भवति कीदृशं अष्टाधिपत्यं अणिमाद्यैश्वर्यं यस्मिंस्तद्विषयं प्रयास्यन् । किं गुणसन्निवाये गुणसमुदाये ब्रह्माण्डे इत्यर्थः । तर्हि इन्द्रियैः मनसा च सह
मनसेन्द्रियैश्च सहैव गच्छेत् किन्तु लिङ्गदेहेन सहैव लोकान्तरं गच्छेत् । ततः कर्मगतिवत् योगगतिः परिच्छिन्ना इत्याह । योगेश्वराणां त्रिलोक्याः अन्तर्बहिश्च गतिमाहुः । अत्र हेतुः पवनान्तरात्मनां । आत्मा लिङ्गशरीरं येषां
इति । विद्यादयस्तासां तपोयोगादयः । योगः समाधिः कर्मगतिः इत्याह । वैश्वानरमिति । सुषुम्णया ब्रह्मपथेन वैहायसा आकाशेन ब्रह्मलोकं गतः सन् प्रथमं वैश्वानरं अग्न्यभिमानिनीं देवतां याति । अनया

यदि प्रयास्यन् नृप पारमेष्ठ्यं वैहायसानामुत यद्विहारं । अष्टाधिपत्यं गुणसन्निवाये सहैव गच्छेन्मनसेन्द्रियैश्च ॥२२॥ योगेश्वराणां गतिमाहुरन्तर्बहिस्त्रिलोक्याः पवनान्तरात्मनाम् । न कर्मभिस्तां गति-
माप्नुवन्ति विद्यातपोयोगसमाधिभाजाम् ॥२३॥ वैश्वानरं याति विहायसा गतः सुषुम्णया ब्रह्मपथेन शोचिषा । विधूतकल्कोऽथ हरेरुदस्तात् प्रयाति चक्रं नृप शैशुमारम् ॥२४॥ तद्विश्वनाभिं त्वतिवर्त्य विष्णो-
रणीयसा विरजेनात्मनैकः । नमस्कृतं ब्रह्मविदामुपैति कल्पायुषो यद्विबुधा रमन्ते ॥२५॥

येन सुषुम्णया नाड्या शोचिषा अर्चिरादिमार्गेण विधूतकल्कः निर्मलः सन् ऊर्ध्वं ब्रह्मलोके नाड्या सर्वलोकाः हरेः संबन्धि यत्र इत्यर्थः । शैशुमारं चक्रं
मस्तकं प्रति शिशुमारसमं ज्योतिश्चक्रं सन्निधानानि आदिवादि इत्यर्थः । तद्विश्वनाभिं विश्वस्य नाभिं सूक्ष्मेण अविरजेन लिङ्गशरीरेण अतिक्रम्य एकः स्वर्गमपि
सावोदकमेव निर्मलेन लिङ्गशरीरेण एकः ब्रह्मविदां स्थानं अन्यैर्नमस्कृतं महर्लोकमुपैति । यद्यस्मिन् विबुधाः भृग्वादयः कल्पायुषो रमन्ते ॥२५॥ ॥श्री॥ ॥ ॥

अथान्तकस्य कल्पान्तविश्वं त्रैलोक्यं प्रतिगच्छन् दह्यमानं निरीक्ष्य ततः धूमप्राकारं द्विपवाद्र्यस्थायितत्वात् अमर्त्यं पदं पतितिनि स्थिति मि डम्बरे ईश्वरनिधिष्ठानि विमानानि यस्मिन् तत् ड ष्टुति अर्थं सुविशीत । तद्वाह · नयश्रुति ॥
आर्लिङ्ग ईश्वरं डद्ध आश्रये · किन्तु विरूपता रूपता यन्तु दुःखं · अदः कृतं नदकं विना । तत्कृतार्थवति · अनिर्दविदी । द्रैवगवता ध्यानमज्ञानतां आविनी दुनक दुःखाय प्रगवी ज्ञानं गरवाः नन्ननुदर्शितात् तापीरयस्या यद्वा

अथान्तकस्य मुखानलेन दंदह्यमाने स्थितिनीड विश्वं । निर्याति सि द्ध्वनशप्पधिष्ण्यं यद्वेपनाद्र्यं तद्दमानमस्थं ॥ २६ ॥ नयत्र अभक्तो नयदानन्दपद्म स्वीहि
स्ववाद्दगकातः कृतात्मिन् ॥ यद्विलोतादः कृपया निर्दविदी दुःनक दुःख प्रदवानु दर्शनान् ॥ २७ ॥ ॥नामनाम॥ ॥नामनाम॥ ८

विलक्ष्मा मनः यीडति यत् तत् विना कताचिदपि यत्र लोकाद यानसंज्ञीति । तत्र ब्रह्मलोकगतानां त्रिविधा गतिः । यथूल्मालकर्षेणगताः · ततकल्पानकर्य प्रन्धनावानाम्य नाधिकाधिकारवति । यत्तुद्विन्स्म
क्षयासनावलन गताः तद्ब्रह्मलासह मुच्यन्ते ॥ यत्तु रागव ह्यासकाः त स्वकृया ब्रह्मा उंद्भित्वा वैष्णवं पदमाप्नावर्तके ॥ ॥नाम॥ गुरु॥ ॥गुरु॥

तत्र यत्तु तस्य रागवद्धकस्य ब्रह्माण्डदहनप्रकारमाह ॥ ततः स्थूलादिना तत्र यंब्रक्रिया स्वम्वनाधिष्ठितायाः प्रकृतेः कानविंदशानमहत्त्वं रवति तस्याः अनाहंकारः । तस्याः अननगद्य तन्मात्रावातरः । तस्याः अनस्पर्शतन्मात्र
द्वारा वायुः तस्याः अनरूपतन्मात्रद्वारा तेजः । तस्याः अनरसः तन्मात्रद्वारा आपश्च तद् अनगंधः तन्मात्रद्वारा पृथ्वी । तेषु मिलितेषु चतुर्दशभुवनात्मकं विराट्शरीरं तस्य चर्यवाग्वीक्ष्टि यज्ञनविस्तलस्य पृथिव्यादि कलारवि
तारागणद्वाराद्या । कोटियोजनविस्तालं प्रथमावरणं पश्चाद् तत्कोटियोजनविस्तालमिति एक · ततोश्च आदीनां यथविश्रितः अतःश्चवालवाल वदेगुणान्यावरणानि अहमत्तु प्रकृत्यावरणी । यायकमवा तदर्वस्थिता पवि

ततो विजयं प्रतिपद्य निर्दह्य स्वेनात्मना यानल मूर्द्धिनलवन् । अतिमर्थ्या वायुमूर्धल्वकाले वा स्वात्मना खं दहत्यात्मलिंगं ॥ २८ ॥ प्राणेन गन्धं रसनं नवेनस्यं
रूपं च दृष्ट्या श्वसनं त्वचैव ॥ श्रोत्रेण वा येन नरः गुणत्वं प्राणेन वायुं कृति मूर्येति योगी ॥ २९ ॥ ॥ ॥ नार

यावद्भवनरुद्सवकारः कथ्यते · ततो विजयं प्रतिपद्य लिंगदहन पृथिव्यात्मतां आप्यरूपः । एवमुक्तरूपादि उह्यं निर्दह्य कथं यास्यामीति शंकाग्न्यः । ततो त्मना पृथिवीरूपतां विदधता आपः प्रति
पद्य · अलवनं तु तनामकर्वन् तत्स्थानं तदन्त दाहादि शंकारावानु याधर्यमान तु ज्ञानस्वरूपः ॥ एवं अतिमर्थ्यः स्वत्वकालेन अवसाने दहदात्मना लिंगं परमात्म मूर्द्धिन्त्रियपासनं सूर्यचन्द्र वदनद्वाम
मूर्द्धिनाः ॥ तस्य समाप्यकाभिति ॥ इन्द्रियार्थानां एतत्संक्रमणमतिक्रममाह । घ्राणेनाधिष्ठितेन गंधमूपादा श्वसनं स्पर्शनं तत्र उत्पन्नेन यासत्वं । घ्राणेन तत्सूक्ष्मेन्द्रियेण आकृतिं तत्क्रियां ॥ २९ ॥ ॥गुरु॥

तदेवं स्थूलसूक्ष्मशरीरत्यागानि क्रमम्य ज्ञानावरणरूपाहंकारत्यागं महदादिद्वारेणाह ॥ स त्यागी विकार्यं संसाद्य विज्ञानतत्त्वं याति । विविधं कार्यमस्येति विकार्यो हि यान्ति ॥ स हि त्रिविधः तामसो राजसः सात्त्विक इति । तत्र तामसा
द्भूतसूक्ष्माणि जायन्ते राजसादिन्द्रियाणि । सात्त्विकान्मन इन्द्रियदेवाश्च । तदेतदाह । भूतसूक्ष्माणामिन्द्रियाणां च संनिकर्षो लयस्थानं । तामसं राजसं च । मनोमयं देवमयं च सात्त्विकं स्वा
हंकारं एवं गमनेन गत्या तेन सह विज्ञानतत्त्वं याति । ततः गुणानां संनिरोधो लयो यस्मिंस्तत्प्रधानं याति ॥३०॥ तेनात्मनात्मानमुपैति आनन्दमयः सन् उपाधीनामवसाने शान्तमविकारमानन्दं परमात्मानमुपैति

स भूतसूक्ष्मेन्द्रियसंनिकर्षं मनोमयं देवमयं विकार्यं । संसाद्य गत्या सह तेन याति विज्ञानतत्त्वं गुणसंनिरोधं ॥३०॥ तेनात्मनात्मानमुपैति शान्तमानन्दमानन्दमयो व
साने । एतां गतिं भागवतीं गतो यः स वै पुनर्नेह विषज्जतेऽङ्ग ॥ एते सृती ते नृप वेदगीते त्वयाभिपृष्टे च सनातने च ये वै पुरा ब्रह्मण आह पृष्ट आराधितो भगवान्वासुदेवः ॥३२॥

न विषज्जते नावर्तत इत्यर्थः ॥३१॥ एते इति मार्गौ प्रकारौ वेत्यर्थः । हे नृप अनपेक्ष्य निर्दिश्य मर्द्दस्व विसर्जन पर्यं गतं इति यास क्रममुक्तिः एका सद्योमुक्तिः यदि त्वया पृष्टे हि नाक्रममुक्तिसुखि श्रयाः । एते सृती वेदगीते अनन्
त्वायुक्तिः । तत्र यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि स्थिताः । अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुत इति । सद्योमुक्तिः । ते ब्रह्मलोके तु परान्तकाले परामृताः परिमुच्यन्ति सर्वे इति क्रममुक्तिः यदा न कर्मसि सांगति मा पूर्वमीति दकार्मार्गस्य विस्
विवादान् एते सृती इति द्विवचनं । त्वया हि पृष्टे अन्यत्र मित्रादि प्रश्नेनार्थान्मुक्तिविषये च अपि सनातने च वेदनित्ये वा विपर्यय इति यदि एता ये यथार्थास्ते एवं त्वया च ये पृष्टे ते सृती इत्यन्वयः ॥३२॥ ॥ ९ ॥

सृती संसरतां पुंसां ब्रह्मणा मार्गौ । तथा यामदयः समीचीनत्वं पयमनुस्मरह । न हीति । यतोऽनुष्ठिता भक्तियोगो भवेत् अतोऽन्यः शिवः सुखरूपो न विविधभ्रमतां संसारे । एतदेवाह भगवान् ब्रह्म कूटस्थः नि
र्विकारः एकाग्रचित्तः सन् त्रिरित्यर्थः । त्रिरनुवाकान् कार्त्स्न्येन साकल्येन ब्रह्म वेदं अन्वीक्ष्य विचार्य यत आत्मनि हरौ रतिर्भवेत् तदेव मनीषया अध्यवस्य निश्चितवान् ॥३४॥ ननु भगवता अर्थेन निर्द्देश्यति अनन्तं तस्य भगवति
कथं रतिः स्यात् तत्राह भगवानिति । लक्षितः दृष्टः कथं स्वात्मना अन्तर्यामितया । कैः दृश्यैर्बुद्ध्यादिभिः । तदेव द्रष्टा दृश्यानि ज्ञानादीनि स्वप्रकाशे द्रष्टारं विना न घटन्ते । तत्र ज्ञानादीनि लक्षणानि स्वप्रकाशात्मकं चापि

न ह्यतोऽन्यः शिवः पन्था विशतः संसृताविह । वासुदेवे भगवति भक्तियोगो यतो भवेत् ॥३३॥ भगवान्ब्रह्म कार्त्स्न्येन त्रिरन्वीक्ष्य मनीषया । तदध्यवस्यत्कूटस्थो रतिरात्मन्यतो भवेत् ॥३४॥
भगवान्सर्वभूतेषु लक्षितः स्वात्मना हरिः । दृश्यैर्बुद्ध्यादिभिर्द्रष्टा लक्षणैरनुमापकैः ॥३५॥ तस्मात्सर्वात्मना राजन् हरिः सर्वत्र सर्वदा । श्रोतव्यः कीर्तितव्यश्च स्मर्तव्यो भगवा
न्नृणां ॥३६॥ पिबन्ति ये भगवत आत्मनः सतां कथामृतं श्रवणपुटेषु संभृतं । पुनन्ति ते विषयविदूषिताशयं व्रजन्ति तच्चरणसरोरुहान्तिकं ॥३७॥ ॥ इति श्रीभागवते महा
पुराणे द्वितीयस्कन्धे पुरुषसंस्थानुवर्णनं नाम द्वितीयोऽध्यायः ॥ ॥

लक्षकैः । तथा बुद्ध्यादीनि कर्तृप्रयोज्यानि करणत्वाद्वास्यादिवदिति व्याप्तिमूलानामनुमापकैः स्वगत्युच्च कर्तृत्वमीश्वरसिद्धिः यच्छ्रोतव्यमित्यादि यत्प्रेमलक्षणमुपसंहरति । तस्मादिति । श्रवणादि फलमाह पिबन्तीति पिबन्ती
ति सतां वा आत्मनः आत्मलतेन प्रकाशमानस्य कथैवामृतं विषये दूषितं मलिनीकृतं आशयं पुनन्ति शोधयन्ति । तत्सेवनेन प्राप्नुवन्ति श्रीविष्णुपदं प्राप्नुवन्ति ॥३७॥ ॥ इति द्वितीयस्कन्धे भावार्थदीपिकायां द्वितीयः ॥

ष्यीय विफलकस्तु वेति सर्वं श्रवणामूनः । तस्माद्भक्तिनात्कर्म श्रवणादेव श्रेयस्कं ॥ इदानीमन्यदेवताभजनस्यापि पुत्रादिभजनवत्तुच्छफलत्वेन हेयत्वं वक्तुं पूर्वोक्तमनुवदति ॥ एवमिति ॥ ममेति मां किल विद्वेवया
गेन मनुष्येष्वापत्सु जीवत्सु यमनीषिणस्तु यां तत्रापि यमनियमाः ॥ तसौ विलयात एव मनाङ्भक्तिकथाश्रवणादिकं निगदितं विहितमित्यर्थः ॥ ब्रह्मणस्पतिं वेदपतिं ब्रह्माणं इन्द्रियपटुत्वकाम इन्द्रं प्रजापतीन् दक्षादीन् ॥२॥

श्रीशुक उवाच ॥ एवमेतन्निगदितं पृष्टवान् यद्भवान्मम । नृणां यन्म्रियमाणानां मनुष्येषु मनीषिणां ॥१॥ ब्रह्मवर्चसकामस्तु यजेत ब्रह्मणस्पतिं । इन्द्रमिन्द्रियकामस्तु प्रजाकामः प्रजा-
पतीन् ॥२॥ देवीं मायांतु श्रीकामः तेजस्कामो विभावसुं । वसुकामो वसून् रुद्रान् वीर्यकामोथ वीर्यवान् ॥३॥ अन्नाद्यकामस्त्वदितिं स्वर्गकामोऽदितेः सुतान् । विश्वान् देवान् राज्यकामः
साध्यान् संसाधको विशाम् ॥४॥ आयुःकामोऽश्विनौ देवौ पुष्टिकामः इलां यजेत् ॥ प्रतिष्ठाकामः पुरुषो रोदसी लोकमातरौ ॥५॥ रूपाभिकामो गंधर्वान् स्त्रीकामोऽप्सर उर्वशीं ॥ आधिपत्य- १०
कामः सर्वेषां यजेत परमेष्ठिनं ॥६॥

मायां दुर्गां विभावसुं अग्निं वसुकामः धनार्थी वीर्यप्रभावः तत्कामो वीर्यवान् सन् रुद्रान् यजेत् ॥३॥ अन्नाद्यं तस्यैव अदितेः सुतान् आदित्यान् देवान् विश्वेदेवान् प्रजानां साधकान् साध्यान् यजेत
इलां पृथ्वीं प्रतिष्ठा स्थानादयचूर्ति ॥ रोदसी द्यावाभूमी ॥५॥ अप्सरसां मध्ये उर्वशीं ॥६॥

यज्ञं यज्ञाधिपतिं विष्णुं । कोशो वसुसंचयः । वसुकाम इति अष्टधनमात्रमिति भेदः । दांपत्यम् अन्योन्यप्रीतिः तदेवार्थो यस्य सः ॥७॥ धर्मार्थः धर्मकामः उत्तमश्लोकं यामिनं विष्णुं । तन्तुं तन्वन् संतानं वृद्धिमिच्छन् । रक्षा बाधनिवृत्तिः तत्कामः
पुण्यजनान् यक्षान् । ओजो बलं तत्कामः मरुद्गणान् देवान् । राज्यं यज्ञे तत्कामो मनून् । पालायितारः कर्म्मचार्थः । तत्कामो देवान् विश्वान् देवानिति विशेषः । अभिचरन् शत्रुमरणमिच्छन् निर्ऋतिं राक्षसं कामकामः सोमं गेभ्यः । अकामः वैराग्यकामः

यज्ञं यजेद्यशस्कामः कोशकामः प्रचेतसं । विद्याकामस्तु गिरिशं दांपत्यार्थ उमां सतीं ॥७॥ धर्मार्थ उत्तमश्लोकं तन्तुं तन्वन् पितॄन् यजेत् । रक्षाकामः पुण्यजनान् ओजःकामो मरुद्गणान् ॥८॥ ॥
राज्यकामो मनून् देवान् निर्ऋतिं त्वभिचरन् यजेत् ॥ कामकामो यजेत्सोमम् अकामः पुरुषं परं ॥९॥ अकामः सर्वकामो वा मोक्षकाम उदारधीः । तीव्रेण भक्तियोगेन यजेत पुरुषं परं ॥१०॥
एतावानेव यजतामिह निःश्रेयसोदयः । भगवत्यचलो भावो यद्भागवतसंगमः ॥११॥

पुरुषं परं प्रकृतिप्रवर्तकं परमेश्वरं । अकाम एकान्तभक्तः सर्वकामो वा पुरुषं पूर्णमिवोपाधिं पूर्वोक्तनानादेवताभजनस्यापि संयोगपृथक्त्वेन भक्तियोगेन फलत्वमाह एतावानिति ॥ इदानीं तेषां यजतां ज्ञानं यजने
भागवतानां संगतः भगवत्येव तीव्रा भक्तिर्भवतीति यतः एतावानेव निःश्रेयसस्य परमपुरुषार्थस्योदयः लाभः । अन्यत् सर्वं तुच्छमित्यर्थः ॥ ॥रामहरि॥राम॥हरिहरि॥राम॥हरिहरि॥राम॥हरि॥रामहरि॥
नत्या

यथा चक्रं भ्रमति पुनर्दुःखं भ्रामयति न तथा मुक्ताः सन्तु आगच्छन्तीत्यर्थः।

भगवत्प्रसंगात् एवं ननु त्वितरां हरिकथारतिरित्याह। ज्ञानमिति। यतो यस्मात् ज्ञानं भवति। कीदृशं। आसर्वतः प्रतिनिवृत्तं उपशान्तं। गुणोर्मीणां रागादीनां चक्रं समूहो यस्मात्तत्। तद्भूतात्मप्रसादश्च। यत्र यस्मात् मनःप्रसादः हेतुः गुणेषु विषये-
ष्वसंगो वैराग्यं च उपयत्राति यः। एवंभूतश्च गुणेष्वसंगः। कैवल्यमित्येव सम्मतः पन्था यस्य भक्तियोगः। निर्वृतः ब्रह्मसुखं प्राप्यापि निर्वृतः सन् तत्र हरिकथासु रतिं कथं न कुर्यात्॥ भुक्तियानां उक्तं ऋषिं पतत्ररूपदर्शिनं कविं गद्य

ज्ञानं यदा प्रतिनिवृत्तगुणोर्मिचक्रमात्मप्रसाद उत यत्र गुणेष्वसंगः। कैवल्यसम्मतपथस्त्वथ भक्तियोगः को निर्वृतो हरिकथासु रतिं न कुर्यात्॥१२॥ शौनक उवाच॥ इत्यभिव्याहृतं राजा
निशम्य भरतर्षभः। किमन्यत् पृष्टवान् भूयो वैयासकिमृषिं कविं॥१३॥ एतच्छुश्रूषतां विद्वन् सूत नोऽर्हसि भाषितुं। कथा हरिकथोदर्काः सतां स्युः सदसि ध्रुवं॥१४॥ स वै भागवतो राजा पाण्डवेयो
महारथः। बालक्रीडनकैः क्रीडन् कृष्णक्रीडां य आददे॥१५॥ वैयासकिश्च भगवान् वासुदेवपरायणः। उरुगायगुणोदाराः सतां स्युर्हि समागमे॥१६॥ आयुर्हरति वै पुंसामुद्यन्नस्तं च यन्नसौ। त
॥ मूल ॥ स्यर्ते यत्क्षणो नीत उत्तमश्लोकवार्तया॥१७॥

उक्तमिदानीं एवं तच्छ्रुत्वा राजा हरिकथा उदर्कः उत्तरफलं यासां ताः कथाः सतां भागवतानां सदसि सभायां स्युः। एतत्तु पश्यति। स वा इति द्वाभ्यां। कृष्णस्य क्रीडां यः अंगीकृतवान्। उरुगायस्य गुणैरुदाराः महत्यः कथाः
स्युः। किंच। व्यर्थेन क्षीयमाणमायुः हरिकथया सफलं कर्तुं शौनक आह। त्रिभिः॥१७॥ आयुरिति। असौ सूर्यः उद्यन् उदितः अस्तं च यन् गच्छन्। यत् यत्र क्षणो नीतः। तस्य आयुः। मात्र ऋते विहाय वृथैव हरति॥१७॥ ॥ गुरुभ्यः॥

ननु जीवनमेव तावत् मा भूत् फलमस्तीत्यत आह। तरव इति॥ ननु तरवः श्वासादिमान्ति हरि स्तुतः व्यर्थं भवतः ननु तासामाहारादिकं नास्ति तत्राह। न खादन्ति न मेहन्ति वा सकं मैथुनं न कुर्वन्ति। किंतु न वाधादिः तत्र मन-
पश्वः इति॥१८॥ तदेवाह। श्वविड्वराहोष्ट्रखरैः संस्तुतः सदा भनिन्दपितः यस्य कर्णपथं कदाचिदपि नागतः सः पुरुषः पशुरेव। कस्मात् विषयानुरक्तत्वात् विष्ठाहारप्रमितत्वात्। कंठकवद् दुःखदविषयासक्तत्वात् उष्ट्रः भारवाहि-
त्वात् खरैः तुल्य इत्यर्थः॥१९॥ तस्यांगानि च निष्फलानीत्याह। बिल इति पंचभिः। बत अतिखेदे न शृण्वतः नरस्य कर्णपुटे गर्तवत् एव। न चोपगायति तस्य जिह्वा असती दुष्टा। दर्दुरस्येव जिह्वा

तरवः किं न जीवन्ति भस्त्राः किं न श्वसन्त्युत। न खादन्ति न मेहन्ति किं ग्रामे पशवोऽपरे॥१८॥ श्वविड्वराहोष्ट्रखरैः संस्तुतः पुरुषः पशुः। न यत्कर्णपथोपेतो जातु नाम गदाग्रजः॥१९॥ ॥
बिले बतोरुक्रमविक्रमान् ये न शृण्वतः कर्णपुटे नरस्य। जिह्वासती दार्दुरिकेव सूत न चोपगायत्युरुगायगाथाः॥२०॥ भारः परं पट्टकिरीटजुष्टमप्युत्तमांगं न नमेन्मुकुन्दं। शावौ करौ नो
कुरुतः सपर्यां हरेर्लसत्काञ्चनकंकणौ वा॥ बर्हायिते ते नयने नराणां लिंगानि विष्णोर्न निरीक्षतो ये॥२१॥ पादौ नृणां तौ द्रुमजन्मभाजौ क्षेत्राणि नानुव्रजतो हरेर्यौ। जीवञ्छवो भागव-
तांघ्रिरेणुं न जातु मर्त्योऽभिलभेत यस्तु। श्रीविष्णुपद्या मनुजस्तुलस्याः श्वसञ्छवो यस्तु न वेद गन्धं॥२२॥ ॥टीका॥ भारः पट्टवस्त्रं किरीटं च तेन जुष्टमपि उत्तमांगं शिरो यदि न नमेत् तर्हि केवलं भार एव। शवौ
मृतकौ तावेव लसन्ती काञ्चनकंकणे ययोस्तौ अपि व्यर्थावित्यर्थः। यत् नयने विष्णोर्मूर्तिं न निरीक्षतः ते बर्हायिते मयूरपिच्छतुल्ये। द्रुमवज्जन्म भजतः इति तथा वृक्षमूलतुल्यौ विशेषस्थानानि हरेरालयान् न अनुव्रजतः॥
॥२२॥ श्रीविष्णुपद्याः श्रीविष्णुपदलग्नायाः तुलस्याः गन्धं न वेद न घ्राय जानाति स शव इत्यर्थः॥२३॥

ऽश्मवत्सारं कठिनं यस्य तत् ... हरिनामधेयैः। न विक्रियेत ... यस्मादङ्गीकृतस्य सर्वमिदमर्थं मनसा अनुकूलं च प्रियं ब्रूत॥२५॥ अथ पृष्टः साधु पृष्टः सन् वैयासकिर्नृपतिं यदाह तदभिधेहीति॥
२५॥ इति द्वितीये तृतीयः॥ ... विरक्तायाभिमतं शुकेन ब्रह्मनारदसंवादेनापवर्ण्यते॥ वाग्भिः प्रश्नं कथयितुं तस्य प्राकृतानीं स्थितिमाह। वैयासकेः शुकस्य इति एवं वचः आत्मनस्तत्त्वस्य निश्चयं।

तदश्मसारं हृदयं बतेदं यद्गृह्यमाणैर्हरिनामधेयैः। न विक्रियेताथ यदा विकारो नेत्रे जलं गात्ररुहेषु हर्षः॥२४॥ अथाभिधेह्यङ्ग मनोऽनुकूलं प्रभाषसे भागवतप्रधानः। यदाह वैया
सकिरात्मविद्याविशारदो नृपतिं साधु पृष्टः॥ ॥इति श्रीभागवते महापुराणे द्वितीयस्कन्धे [illegible]वर्णनं नाम तृतीयोऽध्यायः॥ ॥सूत उवाच॥ वैयासकेरिति वचस्तत्त्वनिश्चय १२
मात्मनः। उपधार्य मतिं कृष्णे औत्तरेयः सतीं व्यधात्॥१॥ आत्मजायासुतागारपशुद्रविणबन्धुषु। राज्ये चाविकले नित्यं विरूढां ममतां जहौ॥२॥ पप्रच्छ चेममेवार्थं यन्मां पृच्छथ सत्तमाः। कृ
७४ ष्णानुभावश्रवणे श्रद्दधानो महामनाः॥३॥ संस्थां विज्ञाय संन्यस्य कर्म त्रैवर्गिकं च यत्। वासुदेवे भगवति आत्मभावं दृढं गतः॥४॥ राजोवाच॥ समीचीनं वचो ब्रह्मन् सर्वज्ञस्य तवानघ। तमो वि
शीर्यते मह्यं हरेः कथयतः कथाः॥५॥ भूय एव विवित्सामि भगवानात्ममायया। यथेदं सृजते विश्वं दुर्विभाव्यमधीश्वरैः॥६॥ ॥ ॥टीका॥ वैयासकेः॥ तत्त्वम् उपधार्य। आत्मतत्त्वस्य सतीं कृ
ष्णे उपसमाना त्यक्तसर्वं रताः॥१॥ आत्मेत्यादि ... ममतां जहौ॥२॥ एतमेवार्थं हरिलीलालक्षणं॥३॥ संस्थां मरणं त्रैवर्गिकं धर्मार्थकामप्रधानं। संन्यस्य त्यक्त्वा आत्मभावं चित्तमनः ... भगवत्यासक्तं गतः ... पूर्वं ...
पतः। मह्यं मम तमो अज्ञानं नश्यति। तव कथयतः सतः त्वत्तः समीचीनं पुनः ... विवित्सामि ज्ञातुमिच्छामि। दुर्विभाव्यं अधीश्वरैः अपि विवेक्तुमशक्यं॥६॥

यथा सृजति गोपायति पालयति। संयच्छति संहरति। पुरुशक्तिर्बहुशक्तिमान्। क्रीडन् यथा करोति आत्मानं ब्रह्मादिरूपेण। क्रीडयन् विकरोति विविधं करोति। एकः पुरुषरूपेण युगपत्क्रमशः ... क्रमशो वा यथा
प्रकृतेर्गुणाननुगृह्णाति। विचिकित्सितं संदिग्धं। शब्दे ब्रह्मणि वेदे निष्णातः ध्याने परस्मिन्ब्रह्मणि च। उपामन्त्रितः प्रार्थितः। प्रचक्राम वक्तुं नमस्कारात्मकं मङ्गलं उपचक्रमे इत्यर्थः॥ ॥तदाह॥ ... परस्मै सदित्यादि

यथा गोपायति विभुर्यथा संयच्छते पुनः। यां यां शक्तिमुपाश्रित्य पुरुशक्तिः परः पुमान्॥७॥ आत्मानं क्रीडयन् क्रीडन् करोति विकरोति च। नूनं भगवतो ब्रह्मन् हरेरद्भुतकर्मणः॥८॥ दुर्विभाव्यमिवा
भाति कविभिश्चापि चेष्टितं। यथा गुणांस्तु प्रकृतेर्युगपत्क्रमशोऽपि वा। बिभर्ति भूरिशस्त्वेकः कुर्वन्कर्माणि जन्मभिः॥ विचिकित्सितमेतन्मे ब्रवीतु भगवान्यथा॥९॥ शब्दे ब्रह्मणि निष्णातः परस्मिन्
भगवान्खलु॥ ॥सूत उवाच॥ इत्युपामन्त्रितो राज्ञा गुणानुकथने हरेः। हृषीकेशमनुस्मृत्य प्रतिवक्तुं प्रचक्रमे॥ ॥शुक उवाच॥ नमः परस्मै पुरुषाय भूयसे सदुद्भवस्थाननिरोधलीलया।
गृहीतशक्तित्रितयाय देहिनामन्तर्भवायानुपलक्ष्यवर्त्मने॥१२॥ [illegible]
परब्रह्मणे। भूयसे अपरिमितमहिम्ने। तद्दर्शयति सतः प्रपञ्चस्य उद्भवादिषु निमित्तभूतया लीलया गृहीतं ब्रह्मादिरूपेण रजआदिशक्तित्रितयं येन। तस्मै अन्तर्भवाय। अन्तर्यामिने। अत एव सद्भक्तिरहितैरनुपलक्ष्यं

विच्छिद्य स्खलदात्मत्वमनुस्मरन्नु प्रणमति॥ भूयः पुनर्नमः। सतां धर्मवर्त्तिनां वृजिनच्छिदे दुःखच्छेदके। असतां अधर्मशीलानां असंभवाय अनुद्भवहेतवे। अखिलसत्वमूर्त्तये। सत्वादिरूपेण सत्वस्वरूपायेत्यर्थः॥
समग्रसत्वमूर्त्तय इति वा॥ पुनर्नमः पूर्वोक्तस्यैवेत्थं रूपमाह। पारमहंस्ये परमहंसकुले प्राप्य आश्रमे व्यवस्थितानां पुंसां अनुमृग्यं आत्मविनसनेन पुनःपुनर्मृग्यं यदात्मतत्वं तस्य दाशुषे दात्रे॥१३॥ सात्वतां रक्षकानां स यदा
य। पालकाय। कुयोगिनामिन्द्रियहीनानां विदूरकाष्ठादिगवधिर्यस्य दूरस्थायेत्यर्थः। तदेवं धीयमय सर्वानिव पिनिर्दयितव्याय विनेय भोवर्षमाह। निरस्तं साम्यं अतिशयश्च यस्य यस्य यदपकाया। अन्यस्य साम्यमतिशयश्च नास्ति। तेनाराध

भूयो नमः सद्वृजिनच्छिदे ऽसतामसंभवायाखिलसत्वमूर्त्तये। पुंसां पुनः पारमहंस्य आश्रमे व्यवस्थितानामनुमृग्यदाशुषे॥१३॥ नमो नमस्तेस्त्वृषभाय सात्वतां विदूरकाष्ठाय मुहुः कुयोगिनां।
निरस्तसाम्यातिशयेन राधसा स्वधामनि ब्रह्मणि रंस्यते नमः॥१४॥ यत्कीर्त्तनं यत्स्मरणं यदीक्षणं यद्वन्दनं यच्छ्रवणं यदर्हणं॥ लोकस्य सद्यो विधुनोति कल्मषं तस्मै सुभद्रश्रवसे नमो नमः॥१५॥ १२

सैश्वर्येण स्वधामनि स्वरूपब्रह्मणि रममाणाय॥१४॥ सर्वसाधनरूपा भक्तिः श्रेष्ठेत्यनुस्मरन् प्रणमति यत्कीर्त्तनमिति द्वाभ्यां। अर्हणं पूजनं सुभद्रं मंगलं श्रवः यशो यस्य तस्मै॥१५॥ विचक्षणा विवे
किनः यच्चरणयोरुपसादनात् उपसत्तेः भजनात् अन्तरात्मना मनसः उभयतः ऐहिकं पारत्रं च संगं व्युदस्य त्यक्त्वा गतक्लमाः प्रयासरहिताः॥१६॥

॥मूल॥ विचक्षणा यच्चरणोपसादनात् संगं व्युदस्योभयतोन्तरात्मनः। विन्दन्ति हि ब्रह्मगतिं गतक्लमाः तस्मै सुभद्रश्रवसे नमो नमः॥१६

यशस्विनां

र किंच ज्ञानिनां सर्वसाधनवैफल्यं दर्शयन्नमति। तपस्विन इति। मनस्विनो धीमन्तः सुमंगलाः सदाचाराः यस्मिन् तपआद्यर्पणे सुभद्रश्रवसे स्वस्यार्पणक्रियार्पणः श्रवणादेः प्राधान्यख्यापनाय॥ ॥एवं भक्तिशुद्धिरुत्कर्षं दर्शय
न्नाह। किरातहूणा इत्यादि। यथा याज्ञिकाः अन्ये च ये कर्मतः पापरूपाः ते यदपाश्रयाः भागवताः तदाश्रयाः सन्तः शुध्यन्ति। असंभावनां निराकर्तुं विष्णवनीति। प्रभविष्णवे प्रभवनशीलायेति। सर्वोपास्यत्वमनुस्मरन् प्रार्थयते। स एष आत्म

तपस्विनो दानपरा यशस्विनो मनस्विनो मन्त्रविदः सुमंगलाः क्षेमं न विन्दन्ति विना यदर्पणं तस्मै सुभद्रश्रवसे नमो नमः॥१७॥ किरातहूणान्ध्रपुलिन्दपुल्कसा आभीरकंका यवनाः खसादयः येन्ये च पापा
यदपाश्रयाश्रयाः शुध्यन्ति तस्मै प्रभविष्णवे नमः॥१८॥ स एष आत्मात्मवतामधीश्वरस्त्रयीमयो धर्ममयस्तपोमयः॥ गतव्यलीकैरजशंकरादिभिर्वितर्क्यलिंगो भगवान् प्रसीदतु॥१९॥ श्रियः पतिर्य
ज्ञपतिः प्रजापतिर्धियांपतिर्लोकपतिर्धरापतिः। पतिर्गतिश्चान्धकवृष्णिसात्वतां प्रसीदतां मे भगवान् सतांपतिः॥२०॥ यदंघ्र्यभिध्यानसमाधिधौतया धियानुपश्यन्ति हि तत्वमात्मनः वदन्ति चैतत्कव

वाः। धीवाणि आत्मा। आत्मवतां नाथस्येत्यर्थः। त्रयीमयत्वादिविशेषणैः श्रुतिमार्गेण उपास्यत्वं विवक्षितं। गतव्यलीकैर्निः मूल॥ यो यथारुचं स मे मुकुन्दो भगवान् प्रसीदतां॥२१॥ ॥
कपटैः इति वितर्क्यः अनुमेयः लिंगं मूर्त्तिर्यस्य स प्रसीदतु॥१९॥ सर्वपालकत्वमनुस्मरन्नाह। श्रिय इति। गतिश्च सर्वोपि स्वनरूपकः। ज्ञानप्रदत्वमनुस्मरन्नाह। यदंघ्रीति। यस्यांघ्रौ अभिध्यानमेव समाधिः तेन धौत
या निर्मलया धिया। यथारुचं स्वबुद्ध्यनुरूपं सगुणनिर्गुणादिरूपैः। यदानुरूपं भक्त्या यथामतीत्यर्थः॥२१॥

कियत्पुनाकल्पादौ अजस्य हृदि सृष्टिविषयां स्मृतिं वितन्वता येन प्रचोदिता सती सरस्वती तस्य मुखतः किल प्रादुर्भूता। स्वानि लक्षणानि शिक्षायुक्तानि यस्याः सा। ऋषीणां ज्ञानप्रदानां प्रवर्तकः श्रेष्ठः॥२२॥ भूतानि स्वकार्यैर्भूतभ
नाकृतिनी निर्गमनवर्त्मानि दिशां प्रार्थयेत्। रहतेविति। सः भवयोनि मूलदृष्टि मूलकेषु अन्यस्यैव वसा। अन्ययामलं कार्यात् स्वैरेव मायया तस्याः कर्मानि नामानि विकल्पयति। याम हृत्स्थितः इमाः पुरः शरीराणि सृष्ट्वा अमूषु

प्रचोदिता येन पुरा सरस्वती वितन्वता अजस्य सतीं स्मृतिं हृदि। स्वलक्षणा प्रादुरभूत्किलास्यतः स मे ऋषीणामृषभः प्रसीदतां॥२२॥ भूतैर्महद्भिर्य इमाः पुरो विभुर्निर्माय शेते यदमूषु पूरुषः॥ भुंक्ते
गुणान् षोडश षोडशात्मकः सोलंकृषीष्ट भगवान्वचांसि मे॥२३॥ नमस्तस्मै भगवते वासुदेवाय वेधसे। पपुर्ज्ञानमयं सौम्या यन्मुखाम्बुरुहासवं॥२४॥ एतदेवात्मभू राजन् नारदाय वि १४
पृच्छते। वेदगर्भोभ्यधात्साक्षाद्यदाह हरिरात्मनः॥२५॥ ॥ इति श्रीभागवते महापुराणे पारमहंस्यां संहितायां वैयासिक्यां द्वितीयस्कन्धे चतुर्थोऽध्यायः॥ ॥शुभं॥

पूर्वं कथयितुमयोग्यं। अथ पूर्वस्य समाप्त्यां प्रमाणयति · यद्यस्मात्स्वनुयश्रुति। अत एव यः एकादशेन्द्रियपञ्चभूतात्मा नृपान् षोडशान् गुणान् भुङ्क्ते। उक्तं प्रकाशयति · यान्यत्र वितानोद्धतान्नयदन्ते। अमूषु पुरेषु शेते
षोडशमात्मानामात्मा वृत्तयो यस्य सः। अर्थः न लंकृषीष्ट अलंकृतानि करोतु · प्रार्थनायामाशीर्लिङ्॥२३॥ श्रीव्यासं नमस्करोति। नमस्तस्मा इति। सौम्याः साधवो यस्य मुखाम्बुरुहः आसवामृतं पपुः॥२४॥ इदानीं शुक आह्वाय्या उपसंहरति सर्ववाद
सौति॥ ॥एतदेवेति उत्पत्तिसमयस्यैव वेदगर्भः ब्रह्मा साक्षाद्विरिर्यदाह॥२५॥ ॥ इति श्रीभागवते भावार्थदीपिकायां टीकायां द्वितीये चतुर्थोऽध्यायः॥ ॥शुभं॥ ॥

पञ्चमे नारदेनाथ पृष्टः स्रष्टादिदेव उः। हरेर्लीलाविभूतिः स्पृष्टिं कालकर्मादि लक्षितः। नारदाय विरिञ्चोक्तां वेदगर्भः यथाविभुक्तं। तत्र नारदः प्रश्नमाह। देवदेवेति। हे भूतभावन। अत एव सर्वेषां पूर्वज। अनादे। ज्ञायतेऽनेनेति
ज्ञानं। तत्साधनं यत्। तद्विजानीहि · विशेषेण ज्ञापयेत्यर्थः। कथंभूतं आत्मतत्त्वं निदर्शयत्यनेनेति॥१॥ उपलक्षणीभूतं विषयमवान्तरज्ञानसाधनं अतस्तच्छिष्य पृच्छति। यद्रूपं येन रूप्यते प्रकाश्यते। यदधिष्ठानं यदाश्रयं
यतो यातः सृष्टं यत्संस्थं यस्मिन् लीयते। यत्परं यदधीनं॥ यच्चेति यदात्मकं। स्वतः सत्कारणान्तरमित्यर्थः। तस्य तत्त्वं याथार्थ्यं तत्त्वतो वद। न जानामीति न वक्तव्यमित्याह॥ सर्वमिति॥ हि एतज्ज्ञातं त्वं भूतमुत्पद्यमानं एवं तु ज्ञायमानं त

श्रीनारद उवाच॥ देवदेव नमस्तेऽस्तु भूतभावन पूर्वज। तद्विजानीहि यज्ज्ञानमात्मतत्त्वनिदर्शनं॥१॥ यद्रूपं यदधिष्ठानं यतः सृष्टमिदं प्रभो। यत्संस्थं यत्परं यच्च तत्तत्त्वं वद तत्त्वतः॥२॥ सर्वं ह्येतद्भवान्वेद
भूतभव्यभवत्प्रभुः। करामलकवद्विश्वं विज्ञानावसितं तव॥३॥ यद्विज्ञानो यदाधारो यत्परस्त्वं यदात्मकः। एकः सृजसि भूतानि भूतैरेवात्ममायया॥४॥ आत्मन् भावयसे तानि न पराभावयन्स्वयं
॥मूल॥ आत्मशक्तिमवष्टभ्य ऊर्णनाभिरिवाक्लमः॥५॥ ॥

मं प्रत्यक्षतः। अतः विशिष्टेन ज्ञानेनावसितं निश्चितं॥३॥ अस्याभिप्रायं। आदौ तावत्तमेव कथयस्वेत्याह। यद्विज्ञानं यस्य करणमेव विज्ञानमित्यर्थः। यदाधारः कस्त्वं आश्रयः यत्परः यदधीनः यदात्मकः यत्स्वरूपः॥ ॥
तममुत्तममेव स्वतन्त्रं पश्यन्निश्चयेन इति बुद्धिः॥४॥ न च तदयुक्तं इत्यनेनेत्युपलक्षयापि स्वामी आह। सा दुर्बोधबुद्धिः॥ एकः असहायः आत्मनि परावयस्य पालयसि। स्वयमेव परात्परम् प्राप्यन् अक्रमः श्रमरहितः॥
यथा ऊर्णनाभिरात्मन एव तन्तून् सृजत्येवं निमेषमात्रेण सृजसि॥५॥

तस्मात् अहं तु अस्मिन् विश्वस्मिन् परं उत्तमं अपरं अधमं समं मध्यमं च। तथापि नाम मनुष्यादि रूपं द्विपदत्वादि गुणः। शुक्लत्वादि तैर्भाव्यं साध्यं तथापि सदसत् स्थूलं सूक्ष्मं च किंचदयन्यतो न वेद ॥७॥ किन्तु त्वत्त एव सर्वं
ऽवगतमिति मन्ये स तथाविधो ऽपि। तवोक्तं यौवनदितीत्यत। तेन नास्मान् खेदयसे माम्यसि यतः परां नीकां ँ च यान्न कांकां च प्रयच्छसि ॥८॥ यथैवाहं त्वयानुशासितः शिक्षितः सन् बुद्ध्या बुध्ये तथा विशेषेण ज्ञापय उपरमति नैवाति
रुच्यन्त पृच्छतं वदं विविचिकित्सितं संदेहः तत्सूचकः प्रश्नो ऽयं सम्यगित्यर्थः। यतः कारुणिकस्य तवायं प्रश्नः ॥८॥ अत्र हेतुः सूचयन् यदहं परमधर्मे भगवद्वीर्यप्रकाशने प्रवर्तितोऽस्मि। अतस्त्वं ज्ञातं नापि मयि कृपा भवकृत

नाहं वेद परं ह्यस्मिन्नापरं न समं विभो। नामरूपगुणैर्भाव्यं सदसत्किञ्चिदन्यतः ॥७॥ स भवानचरद्घोरं यत्तपः सुसमाहितः। तेन खेदयसे नस्त्वं पराशंकां च यच्छसि ॥८॥ एतन्मे पृच्छतः सर्वं सर्व
ज्ञ सकलेश्वर। विजानीहि यथैवेदमहं बुध्येऽनुशासितः ॥८॥ ब्रह्मोवाच ॥ सम्यक् कारुणिकस्येदं वत्स ते विचिकित्सितम्। यदहं चोदितः सौम्य भगवद्वीर्यदर्शने ॥९॥ नानृतं तव तच्चापि यथा मां प्र
ब्रवीषि भोः। अविज्ञाय परं मत्त एतावत्त्वं यतो हि मे ॥१०॥ ॥टीका॥ नानृतमित्यर्थः। ननु त्वमेव भगवानित्युक्तं त्वया एकः स उक्तोऽसि स्रष्ट्रादीनां आदिना सत्यं यथा नामीश्वरत्वं न तावत्। तदपि
तत्परं श्रीनाथस्य यतः कारणात् एतावत्त्वं प्रभवस्थानः एतावत्त्वं मन्यसि। किन्तु मत्तः परं भगवन्तमविज्ञायैव न बुध्यसे। अतः सा त्वदुक्ता अस्मदीयशक्तिः तत्त्वबुद्धिपूर्वं न तावदित्यर्थः। येन स्वरोचिषा
वर्ते तमविज्ञाय इत्यन्वयः ॥१०॥

१३

तद्धि कोऽसावीश्वरः स्वरूपप्रकाशो भगवान्नमः कुर्वन्नेव तं कथयति येनेति। येन स्वप्रकाशेन रोचितं प्रकाशितं सद्विश्वं प्रकाशयामि स्तौमि। कथयामि ॥ यथार्कोदय स्वेतरन्यः सकाश्यमेव प्रकाशयन्ति। तथैव अग्निरि
त्यादयो ऽपि अर्थस्तारा इति न च अज्ञानकार्यं नमाविद्या अनाद्यमनिमित्तं मनुष्यादि सर्वं ममात्मा सर्वमिदं विजानीति। तस्मै नमो धीमहि। यस्य मायया मोहिताः सन्तो यूयं दयया मां जगद्गुरुं जगत्कर्तारं वदन्ति तस्मै
यन्माययेति मायां सर्वलोकं जनस्या दुर्जयत्वात्। स्वयं तस्यापि किमस्ति संशयः नैव सोऽहं मायाकृतमस्तो जानाति इति यस्य दृष्टिपथे स्थातुं विलज्जमानया वतादित्या [illegible] र्यम कर्तृत्वा अमुया मायया विमोहिता मुदस्वाद

येन स्वरोचिषा विश्वं रोचितं रोचयाम्यहम्। यथार्कोऽग्निर्यथा सोमो यथर्क्षग्रहतारकाः ॥११॥ तस्मै नमो भगवते वासुदेवाय धीमहि। यन्मायया दुर्जयया मां वदन्ति जगद्गुरुम् ॥१२॥
विलज्जमानया यस्य स्थातुमीक्षापथेऽमुया। विमोहिता विकत्थन्ते ममाहमिति दुर्धियः ॥१३॥ द्रव्यं कर्म च कालश्च स्वभावो जीव एव च। वासुदेवात्परो ब्रह्मन्न चान्योऽर्थोऽस्ति तत्त्वतः ॥१४॥

यो दुर्धियः। अविद्यावृतज्ञानाः एवं कथयन्ति विकत्थन्ते श्लाघन्ते अनन्तरमुपमिलस्य प्रपञ्चस्यास्य चमूर्तस्य भवति। तद्देवं स्वस्मादन्यं परमेश्वरं निरूपयन्नाह यदधिष्ठानमित्यादि न तत्प्रपञ्चं सर्वं तद्व्यतिरिक्तं नास्तीत्याह। द्रव्यमिति
द्रव्यमिति द्रव्यं महाभूतानि उपादानरूपाणि कर्म जन्मनिमित्तं कालः तत्क्षोभकः स्वभावः तत्परिणामहेतुः जीवो भोक्ता। वासुदेवात्परो नान्योऽर्थो नास्ति कारणं तत्कार्य
यस्य ॥

गत्युपायं वयमिति ह्यखो॥ नारायणः परः कारणीयमाः ॥ अनेनैव शास्त्रार्थप्रतिपादनेन न्यद्ब्रह्मादीनां सर्वज्ञत्वादिकं वाक्यैः देवाश्च तदङ्गजाताः अतो न तथैव ति का लोकाः स्वर्गादयस्तदानन्दांशमखास्तत्साधनत्वात् योगः प्राण
यामादिः॥ तपस्तत्साध्यं विशेषकार्थं ज्ञानं तत्साध्यं गतिः तत्फलं अनेनैव सर्वं तदधीनमित्युक्तं तर्हि त्वं किं कर्तासीत्यपेक्षायामाह । तस्येति द्रष्टुरपि ईशस्य सृजामि॥ सृज्यं कृत्या कटाक्षेण । तत्र हेतुं द्रष्टुर्विशेषणः ननु कथं जीवस्य बन्धक्रिया
गः यत्नाहं प्रेर्यः सच कस्त्वादिरूपश्चात्मा जीवस्य च क्रियाः तं हेतुमाह । त्रिभिः सत्वमिति निर्गुणस्यापीश्वरस्यैते त्रयो गुणा बन्धकारणस्त्विति त्रयः कथं स्तत्र तत्रेवाह स्थितिसृष्टिनिरोधार्थं मायया गृहीताः वस्तुतः सर्वदा मुक्तमपि मायि

नारायणपरा वेदा देवा नारायणाङ्गजाः॥ नारायणपरा लोका नारायणपरा मखाः॥१५॥ नारायणपरो योगो नारायणपरं तपः॥ नारायणपरं ज्ञानं नारायणपरा गतिः॥१६॥ तस्यापि द्रष्टुरीशस्य
कूटस्थस्याखिलात्मनः॥ सृज्यं सृजामि सृष्टोऽहमीक्षयैवाभिचोदितः॥१७॥ सत्वं रजस्तम इति निर्गुणस्य गुणास्त्रयः॥ स्थितिसर्गनिरोधेषु गृहीता मायया विभोः॥१८॥ कार्यकारणकर्तृत्वे द्रव्यज्ञानक्रि- १६
याश्रयाः॥ बध्नन्ति नित्यदा मुक्तं मायिनः पुरुषं गुणाः॥१९॥ स एष भगवान् लिङ्गैस्त्रिभिरेतैरधोक्षजः॥ स्वलक्षितगतिर्ब्रह्मन् सर्वेषां मम चेश्वरः॥२०॥ ||

नं मायाविनमपि पुरुषं जीवं बध्नन्ति तत्कार्यमभिव्यक्तिः कारणमध्यात्मं कर्ताधिदैवतं तथा तादृक्त्वं तस्मिन् द्रव्यं महाभूतानि ज्ञानं देवताः क्रिया इन्द्रियाणि तदाश्रयाः यतो कारणत्वेनातः तदभिमानेन बध्नन्ति गुणाः स एव वस्तु
मायः एभिर्लिङ्गैः गुणैरधोक्षजो नामावरणकृतमायाविशिष्टः ब्रह्मन् स्वलक्षिता गतिस्तत्त्वं यस्य सः । सोऽहं केवलं लक्षितगतिर्यस्येति वा॥ ॥राम राम॥ रामनाम॥ ॥रामरामराम॥ रामराम॥ ॥राम ॥राम॥

तस्य सृष्टिप्रकारमाह । कालमिति॥ कर्म जीवादृष्टं विबुभूषुः विविधं भवितुमिच्छुः॥२१॥ गुणानां व्यतिकरः क्षोभः साम्यत्यागः स्वभावतः परिणामः रूपान्तरापत्तिः पुरुषः पुरुषेणाधिष्ठितात् तदीक्षणात् महत्तत्व
स्य॥२२॥ विकुर्वाणात् विक्रियमाणात् तस्य च क्रियाशक्तित्वात् निर्गुणस्यापि रजःसत्वाभ्यामुपबृंहितात् अहंकारस्य तामसत्वमाह प्रधानत्वं एवाहंकारकार्यभूतानामसमाकाशादिकं द्रव्याजसत्तोलीकर्वाश्यद्वंद्विविधा
धिपतयेव तामसाधिदेवा॥२३॥ स च विकुर्वन् त्रयात्मकं त्रिविधं भवति । वैकारिकः सात्विकः तैजसो राजसः यद्भिदा यस्य भेदः । द्रव्यशक्तिर्विषयादीनि यस्यास्तिनानि तद्रूपत्वात् तस्य तेनेति द्रव्य । महाभूतमस्य गतिर्यस्य क्रियाशक्तिः इन्द्रिय

कालं कर्म स्वभावं च मायेशो मायया स्वया॥ आत्मन् यदृच्छया प्राप्तं विबुभूषुरुपाददे॥२१॥ कालाद्गुणव्यतिकरः परिणामः स्वभावतः॥ कर्मणो जन्म महतः पुरुषाधिष्ठितादभूत्॥२२॥ महतस्तु वि
कुर्वाणात् रजःसत्वोपबृंहितात्॥ तमःप्रधानस्त्वभवद् द्रव्यज्ञानक्रियात्मकः॥२३॥ सोऽहंकार इति प्रोक्तो विकुर्वन् समभूत् त्रिधा॥ वैकारिकस्तैजसश्च तामसश्चेति यद्भिदा॥२४॥ द्रव्यशक्तिः क्रियाशक्तिर्ज्ञानश
क्तिरिति प्रभो॥ तामसादपि भूतादेर्विकुर्वाणादभून्नभः॥ तस्य मात्रा गुणः शब्दो लिङ्गं यद् द्रष्टृदृश्ययोः॥२५॥

ज्ञानशक्तिर्यस्य ज्ञानप्रदत्वात् क्रियाशक्तिर्यस्य इन्द्रियप्रवर्तकत्वात्॥२४॥ तामसादपि भूतादेर्विकुर्वाणादभून्नभः ननु तामसात् प्रथमं नभः कारणमित्याह सति सत्त्वगुणस्य तामसात्मजा सूक्ष्मरूपं गुणः शब्दः सा धर्मः यावत् लक्षणधर्मः तद्धर्मान्तरः
उपलक्षणं प्रत्यर्थः । एवं भवस्य नभसि दृश्यत्वे द्रष्टृदृश्ययोः लिङ्गमिति । कृत्या यत्नेन विशेषेण जागर्ति तयोर्लिङ्गं बोधकं दृश्यमेतत्॥२५॥ ||

परस्य नभसः कारणत्वेनान्वयाच्छब्दवांश्च वायुः॥ तस्यैव लक्षणं प्राणा। देहधारणं। ओजःसहोबलानि। इन्द्रियमनःशरीरपाटवानि तेषां हेतुरित्यर्थः॥२६॥ स्वतो रूपवत्तेजः। वायुनभसोः कारणत्वेनान्वयात् स्पर्श-
शब्दवच्च। एवं नभसः पृथिव्याप्य परान्वयादधिकान् गुणानाह॥२७॥ घोषः शब्दः॥२८॥ विशेषः पृथ्वी। पृथिव्याश्च परान्वयादधिकान् गुणानाह॥२९॥ मनः [illegible] चन्द्रोपि द्रष्टव्यः [illegible] वैकारिकात् सात्त्विकादहंकार-

नभसोऽथ विकुर्वाणादभूत्स्पर्शगुणोऽनिलः। परान्वयाच्छब्दवांश्च प्राण ओजः सहो बलं॥२६॥ वायोरपि विकुर्वाणात्कालकर्मस्वभावतः। उदपद्यत तेजो वै रूपवत्स्पर्शशब्दवत्॥२७॥ तेजसस्तु विकुर्वा-
णादासीदम्भो रसात्मकं॥ रूपवत्स्पर्शवच्चाम्भो घोषवच्च परान्वयात्॥२८॥ विशेषस्तु विकुर्वाणादम्भसो गन्धवानभूत्। परान्वयाद्रसस्पर्शशब्दरूपगुणान्वितः॥२९॥ वैकारिकान्मनो जज्ञे देवा वैकारिका दश॥ १९
दिग्वातार्कप्रचेतोश्विवह्नीन्द्रोपेन्द्रमित्रकाः॥३०॥ तैजसात्तु विकुर्वाणादिन्द्रियाणि दशाभवन्। ज्ञानशक्तिः क्रियाशक्तिर्बुद्धिः प्राणस्तु तैजसौ। श्रोत्रं त्वग्घ्राणदृग्जिह्वा वाग्दोर्मेढ्राङ्घ्रिपायवः॥ ३१ ॥

कार्याण्याह। दिग्देवता श्रोत्रस्य अर्कश्चक्षुषः अश्विनौ च एवं पञ्च [illegible] ज्ञानामधिष्ठातारः वह्निश्च इन्द्रश्च उपेन्द्रश्च मित्रश्च कश्च प्रजापतिः॥ एते पञ्च वागादीनां कर्मेन्द्रियाणामधि-
ष्ठातारः॥३०॥ यतो ज्ञानशक्तिर्बुद्धिः क्रियाशक्तिः प्राणश्च तैजसाहंकारकार्यौ अतो ज्ञानक्रियाविशेषरूपाणीन्द्रियाण्यपि तैजसादहंकारादभवन्नित्यर्थः॥ ॥तान्याह॥ श्रोत्रमिति। दोः पाणिः मेढ्रः उपस्थः ज्ञानक-
ज्ञानविव[illegible]क्रिताः॥३१॥ ॥

एवं कारणसृष्टिमुक्त्वा कार्यसृष्टिमाह॥ यदैते असंगताः। अमिलिता आसन्। आयतनस्य भोगायतनस्य निर्माणे न शेकुः॥३२॥ तदा सदसत्त्वं प्रधानगुणभावं। उपादाय। स्वीकृत्य। उभयं समष्टिव्यष्ट्यात्मकं शरीरं
॥३३॥ कालकर्मस्वभावानधिष्ठाय स्थितः जीवः परमात्मा। अजीवं अचेतनं॥ अजीवयत् चेतयति स्म॥३४॥ निर्भिद्य पृथक्कृत्य स्थितः इत्यर्थः॥३५॥ तदवयवैर्लोकरचनामाह यस्येति। कट्यादिभिरिति [illegible] मूलपाः
पञ्च लोकाः ऊर्ध्वं सप्त लोकान्। अतलादीन् [illegible] दीन् सप्त॥३६॥ वर्णानामुत्पत्तिं दर्शयति पुरुषस्येति ब्रह्म ब्राह्मणः मुखमिति कार्यकारणयोरभेदविवक्षयोक्तं बाहवः क्षत्रं क्षत्रियाः॥३७॥

यदैतेसंगता भावा भूतेन्द्रियमनोगुणाः। यदायतननिर्माणे न शेकुर्ब्रह्मवित्तम॥३२॥ तदा संहत्य चान्योन्यं भगवच्छक्तिचोदिताः। सदसत्त्वमुपादाय चोभयं ससृजुर्ह्यदः॥३३॥ वर्षपूगसहस्रान्ते
तदण्डमुदके शयं। कालकर्मस्वभावस्थो जीवोऽजीवमजीवयत्॥३४॥ स एव पुरुषस्तस्मादण्डं निर्भिद्य निर्गतः। सहस्रोर्वङ्घ्रिबाह्वक्षः सहस्राननशीर्षवान्॥३५॥ यस्येहावयवैर्लोकान् कल्पय-
न्ति मनीषिणः। कट्यादिभिरधः सप्त सप्तोर्ध्वं जघनादिभिः॥३६॥ पुरुषस्य मुखं ब्रह्म क्षत्रमेतस्य बाहवः। ऊर्वोर्वैश्यो भगवतः पद्भ्यां शूद्रो व्यजायत॥३७॥ भूर्लोकः कल्पितः पद्भ्यां भुवर्लोकोऽस्य नाभि-
तः। हृदा स्वर्लोक उरसा महर्लोको महात्मनः॥३८॥ ग्रीवायां जनलोकश्च तपोलोकः स्तनद्वयात्। मूर्द्धभिः सत्यलोकस्तु ब्रह्मलोकः सनातनः॥३९॥

इदानीमुपासनार्थं लोककल्पनान्तरमनुदर्शयन् सप्त लोकानाह॥ द्वाभ्यां। भूर्लोकः पातालमारभ्य पद्भ्यां। कटिपर्यन्तो ज्ञेयः॥३८॥ स्तनद्वयादिति उपासनार्थं [illegible] यद्वा [illegible] यदा [illegible]
[illegible] दित्यर्थः ब्रह्मलोकः वैकुण्ठाख्यः सनातनः नित्यः न तु सृष्टः उपर्युपरि वर्तीत्यर्थः॥३९॥

२२

श्रानीं चतुर्दश लोकान् प्रकल्पयति । तत्र जघनादिभिः स्तनादयः । पूर्वोक्ता एव सप्त कट्यादिभिः सप्त लोकानाह । तलेत्यादिभिः । कट्यां वातलं तलातलं गुल्फाद्भिः निरुक्तानि वसतलानि ॥४०॥ त्रैलोक्यकल्पनमाह । स्वर्लोकः पातालादिसहितः ॥४१॥
इति द्वितीये पञ्चमः ॥ ॥ षष्ठे विराड्विभूतिश्च प्राकाश्यत्वादि दर्शिता । दृशां श्रीव पूर्वोक्तं सर्वं भूतसूक्ष्मत्वाश्च मानीं वैराजस्य विभूतिः स पञ्च वमनुवर्णयति । वाचां सूक्ष्मत्वादि द्विगिन्द्रियाणां तदधिष्ठातृ वह्न्यादीनां च स्थानं सूक्ष्मं उत्पत्तिस्थानं । क्षे
त्रसां सप्तधातूनां सप्तानां गायत्र्यादीनां च स्थानं । हव्य कव्य अमृतान्नानां जिह्वा सर्वरसस्य मधुरादेः षड्विधस्य च कारणं वरुणादि रसनेन्द्रियस्य तदधिष्ठातुर्वरुणस्य च ।

तलातलं च जङ्घाभ्यां सुतलं जानुनोर्विभोः । ऊरुद्वयं वितलं चातलं च जघनं ततः ॥४०॥ महातलं तु गुल्फाभ्यां प्रपदाभ्यां रसातलं । पातालं पादतलतः इति लोकमयः पुमान् ॥४१॥ भूर्लोकः कल्पितः पद्भ्यां भुवर्लोको
ऽस्य नाभितः । स्वर्लोकः कल्पितो मूर्ध्ना इति वा लोककल्पना ॥४२॥ ॥ इति श्रीभागवते महापुराणे द्वितीयस्कन्धे पञ्चमोऽध्यायः ॥ ॥ ब्रह्मोवाच ॥ वाचां वह्नेर्मुखं क्षेत्रं छन्दसां सप्त धातवः । हव्यक- १८
व्यामृतान्नानां जिह्वा सर्वरसस्य च ॥१॥ सर्वासूनां च वायोश्च तन्नासे परमायने । अश्विनोरोषधीनां च घ्राणो मोदप्रमोदयोः ॥२॥ रूपाणां तेजसां चक्षुर्दिवः सूर्यस्य चाक्षिणी । कर्णौ दिशां च तीर्थानां श्रोत्रमाकाश
शब्दयोः । तद्गात्रं वस्तुसाराणां सौभगस्य च भाजनं ॥३॥

प्राणस्य जिह्वा मूर्ध्ने उत्पत्तिस्थाने एवं सर्वत्रानुक्रमं वर्णयति । सर्वासूनां समस्तप्राणानां तस्य नासे नासापुटे परमायने उत्कृष्टं मोदप्रमोदयोः सामान्यविशेषयोः घ्राणेन्द्रियं परमस्थानं । तेजसां तेजसां रूपाणां प्रकाशकानां चक्षु
रिन्द्रियं । अक्षिणी नेत्रगोलके । सर्वदिक्प्रधानानां । प्रथमाकर्णौ इ द्वयी । कर्णौ श्रोत्रमिन्द्रियं ॥ श्रोत्रमिन्द्रियं । तस्य गात्रं शरीरं वस्तूनां परमाणुः सर्वाङ्गशरीरस्थानं ॥ ॥

अस्य त्वक् स्पर्शस्य वायोश्च । तत्र्यर्थः । सर्वस्य मेधस्य यज्ञस्य । उद्भिज्जजातीनां सर्ववृक्षादीनां येर्वा यज्ञः सम्यक् साधितः । तथा मेव वा केशाः मस्तकस्थाः श्मश्रूणि विद्युताम् । पादकरनखानि शिलालोहादीनां निमित्तानि दृश्यन्ते ॥
क्षेमकर्मणां पालककर्मणां विक्रमः पादन्यासो भूरादि लोकानां आस्पदं आश्रयः । भूरादिगतानां समाश्रयत्वात् । वक्ष्यमाणं ॥ क्षेमालयं शरणं शरणं पादारविन्दं सर्वकामानां वरस्य वरप्रदस्यापि हरेश्चरणावास्पदं । वीर्यस्य शुक्रस्य । लि

त्वगस्य स्पर्शवायोश्च सर्वमेधस्य चैव हि । रोमाण्युद्भिज्जजातीनां येर्वा यज्ञस्तु संभृतः ॥४॥ केशश्मश्रुनखान्यस्य शिलालोहाभ्रविद्युतां । बाहवो लोकपालानां प्रायशः क्षेमकर्मणां ॥५॥ विक्रमो
भूर्भुवः स्वश्च क्षेमस्य शरणस्य च । सर्वकामवरस्यापि हरेश्चरण आस्पदं ॥६॥ अपां वीर्यस्य सर्गस्य पर्जन्यस्य प्रजापतेः । पुंसः शिश्न उपस्थस्तु प्रजात्यानन्दनिर्वृतेः ॥७॥ पायुर्यमस्य
मित्रस्य परिमोक्षस्य नारद । हिंसाया निरृतेर्मृत्योर्निरयस्य गुदः स्मृतः ॥८॥ पराभूतेरधर्मस्य तमसश्चापि पश्चिमः । नाड्यो नदनदीनां च गोत्राणामस्थिसंहतिः ॥९॥ अव्यक्तरससिन्धूनां भू
तानां निधनस्य च । उदरं विदितं पुंसो हृदयं मनसः पदं ॥१०॥ धर्मस्य मम तुभ्यं च कुमाराणां भवस्य च । विज्ञानस्य च सत्त्वस्य परस्यात्मा परायणं ॥११॥ ॥

लिङ्गं शिश्नं तत्स्थाने । उपस्थमिन्द्रियं । प्रजात्यानन्दः सन्तानार्थं संयोगजं सुखं निर्वृतिः तापहानिः तस्याः । परिमोक्षस्य मलत्यागस्य पायुरिन्द्रियं गुदः स्थानं निरृते अलक्ष्म्याः तमसः अज्ञानस्य पश्चिमः पृष्ठभागः । गोत्राणां गिरीणां अस्थिसंघातः अव्य
क्तः प्रधानं रसः सूत्रादिरसाः सिन्धवः समुद्राः भूतानि धनस्य नाशस्य उदरं परं स्थानं विदितं ज्ञातमिति । मनसः अस्मदादिलिङ्गशरीरस्य तुभ्यं तव कुमाराणां सनकादीनां रुद्रस्य श्रीहरेरस्य आत्मा चित्तं परमायनं ॥११ ॥ ॥

२२
१६

नारदश्च सनक सनन्दन सनातन सनत्कुमार। मरीचि अत्रि अङ्गिरा पुलस्त्य पुलह क्रतु वसिष्ठ॥ २

एवं तावत्पुरुषावयवा लोका इति विश्वं तस्मान्न भिन्नं यथा कृत्स्नं स्वरूपं पृथक् सत्त्वं सर्वनियन्तृ सर्वप्रकाशकं नित्यमुक्तस्वरूपमित्यर्थः। उक्तं च तत् देवपूरुषस्य स्वरूपकथनेन। इत्युच्यते॥ ततः सहस्रशीर्षत्वं दर्शयन्। ब्राह्मणोऽस्य मुखमासीदित्यादि यथोक्त तदुपस्थार्थः। पूर्वं व्याख्यातः एवं तावदिति। पुरुषावयवं सर्वमित्यस्यार्थं दर्शयति। अहं भवानिति सार्द्धैस्त्रिभिः। अग्रजाः स्मः सनकादयश्च मरीच्यादयश्च उक्ताश्च सुरासुरनराः लोकाः स्युः जलस्थलनभौकसः इति सर्वं नामभिः सर्वं पुरुष एव नान्यः कथं इत्यर्थः॥ प्रपञ्चेन तस्य च एवमपि तस्मादेवं सप्तभिर्नित्यस्यार्थमाह। तेन पुरुषेणावृतमिति। भूमिं पर्यस्यार्थः। वितस्तिमिति दशाङ्गुलपदस्य। अधीत्य तिष्ठत्यस्य सत्त्व वितस्तिमधिकं व्याप्य तिष्ठति॥ स्वधिष्ण्यमिति विवक्षितं नञ्मात्रं अन्तर्यामित्वादयवि

अहं भवान् भवश्चैव त इमे मुनयोऽग्रजाः। सुरासुरनरा नागाः खगा मृगसरीसृपाः॥१२॥ गन्धर्वाप्सरसो यक्षा रक्षोभूतगणोरगाः। पशवः पितरः सिद्धा विद्याध्राश्चारणा द्रुमाः॥१३॥ अन्ये च विविधा जीवा १९
जलस्थलनभौकसः। ग्रहर्क्षकेतवस्तारास्तडितः स्तनयित्नवः॥१४॥ सर्वं पुरुष एवेदं भूतं भव्यं भवच्च यत्। तेनेदमावृतं विश्वं वितस्तिमधितिष्ठति॥१५॥ स्वधिष्ण्यं प्रतपन् प्राणो बहिश्च प्रतपत्यसौ। एवं विरा
जं प्रतपंस्तपत्यन्तर्बहिः पुमान्। सोऽमृतस्याभयस्येशो मर्त्यमन्नं यदत्यगात्॥१६॥

विराजं। तत्र दृष्टान्तमाह। असौ प्राणः आदित्यः असौ वा आदित्यः प्राण इति श्रुतेः। स्वधिष्ण्यं मण्डलं प्रकाशयन् यथा बहिरपि प्रकाशयति। नित्यमुक्तत्वं दर्शयितुं उक्तं अमृतत्वस्य तस्यार्थमाह। स इति। अमृतस्य मोक्षस्य अभयस्य ईश इति पदं विरक्तिस्तत्रयन्याय मर्त्यमन्नं कर्मफलं यस्माद्यदत्यगात् अतिक्रान्तवान्। अतो न केवलं सर्वात्मकः किन्तु अमृतत्वस्य निजानन्दस्यापि प्रभुरित्यर्थः॥१६॥ ॥राम॥ ॥राम॥ ॥राम॥राम॥ ॥

एवं चात्मकस्य कृत्स्नानि सत्त्वमुक्तत्वमित्यानीयं त्यविदुत्याय। एतावानस्येत्यस्यार्थमाह। महिमेति। एवं चात्मकस्य यस्मात् तत्त्वमिति एष महिमा दुरत्ययः। अयान्स्य पञ्चमहि स्वादि दिशावा। महत्त्वं वा। एतावानस्य महिमा इति तत्र सदुपस्थानं महत्त्वं दर्शितवान् यमगाथे उक्तः॥ तदेव मोक्षानि तन्मुक्तं युक्तं त्र्यादिस्थानानि दर्शयन्। पादोऽस्य विश्वा भूतानीत्यस्यार्थमाह। पादेष्विति। स्थितिपदः स्थित्या। एतावदि लोकास्तेषां पादाङ्गुल्यादयः अंगत्वसमत्वे स्थितिपादस्य पादस्य सर्वाणि तु पादाः सर्वभूतानीति समानाधिकरण्यमविवक्षितमिति ज्ञापनार्थं विवक्षया॥ पादत्रयस्य वचनं वसमन्यात्रिपादस्यामृतं दिवीत्यस्यार्थं वदति॥१७॥ ततः पुरुषत्वे विशिष्टं दर्शयन् त्रिपादस्यामृतं दिवीत्यस्यार्थमाह। अमृतं च तस्य सर्वत्रिपादन्यानि सुखं दिविदुः लोकाः त्रिलोक्यामित्यर्थः॥ तदेव त्रिपादस्य विशेषं दर्शयन्नाह। ऊर्ध्वो लोकानां मूर्धा महर्लोकश्च मस्तकमूर्धसु इवाविजनलोकाः सत्यलोकाः। तमेव

॥०॥ महिमैष ततो ब्रह्मन् पुरुषस्य दुरत्ययः॥ पादेषु सर्वभूतानि पुंसः स्थितिपदो विदुः॥१७॥ अमृतं क्षेममभयं त्रिमूर्ध्नोऽधायि मूर्धसु। पादास्त्रयो बहिश्चासन्नप्रजानां य आश्रमाः॥०॥१८॥

मे। अमृतादिकं अधायि निहितं। नतु त्रिलोक्यां न च नमवसुखं। महर्लोके किस्यक्षेममभयं किन्तु नहि कल्पान्ते त्रिलोकदाहादिना निःसुखं जनलोके तमसा विना निःसुखं यावत्तावदेव सुखस्थानानि नापि साभ्यं। किन्तु महर्लोकवासिनः कल्पान्ते त्रिलोकदाहतापेन जनलोकं गमनादकृतिमत्तम्। तथा नहि महर्लोकादीन् क्षेममभयं। वक्ष्यति हि। त्रिलोक्यां दह्यमानायां शक्त्या सङ्कर्षणाग्निना। यान्त्यूष्मणा महर्लोकाज्जनं भृग्वादयोऽर्दिता इति महर्लोकात् सत्यलोकः सत्यं मा मृगैतमरम्। एतदेवं विश्वमपि का निरुन्धनात् पादा इत्यस्यार्थमाह। न प्रजायन्ते पूता इत्यप्रजानां नैष्ठिकब्रह्मचारि वानप्रस्थ यतयस्तेषामाश्रमाः त्रिलोक्या बहिरासन्॥ ॥राम॥ ॥रामराम॥

गरुमधलुकः। यस्मादवृरुद्धाः उक्तवर्यविग्रनहिताः॥१८॥ अयं चाविकानरेदः। एकस्येवतस्माहनदन। नतत्तकतिन्नविषयगतिदर्शयं स्पातिविषडिहस्यार्थमाह। विविधं मुहूर्तं वतीतिविचरु मनुयः स्वपन्यास्नीराणेद क्विलानलेयो
वलेनिस्माकथं रक्ता रत्नीसागनानगनेसामपवर्नप्राप्तिसाधनरता। स्पूरुरुतुवेनपूनर्वितेभपदी। यपतः अविद्याकर्मनृपा एकाविद्यावनत्साधनोपासनानूपान्या॥१९॥ तदवं विजाउकर्वदि नौरुलवे विघ्नमृक्षानलम एरवनस्यनतवे ल
दर्थं दर्शयितुं तस्माद्विनाउऊ यागहस्यार्थमाह। यस्मादतुंऊकृ तग्रवहुतान्द्रियगुणान्तकाविवाद्वऊकूसन्नीवतः। तनुविन्दं विवाद् दहे द्रवं स्वउज्ञमूतिज्ञानवान् सूर्यम्दवति। प्रवदिवदहस्यत॥२०॥ नश्ववेतूनष एववंतेवं

अनग्निलाका हृयवा गरुम।धाः वृरुद्धाः॥१९॥ सनीविवज्ञमविघ्नक सागनानगनडरा। यदविद्याविद्यावयूनूपक्रहाया एवयः॥१८॥ यस्मादतुंविवाद्ऊकृ रुतान्द्रियगुणान्तकातरकेवामसमधिवं २०
ज्ञाविः सूर्यश्चिवानयन्॥२०॥ यदांस्यनायांवलिनादरुमासं महत्तनथेनाविन्दं यकृसंराचान् पूनूयावयवाहरा॥२१॥ तमूयकृस्यपगवः सवनस्यानाः कुभा। रूदं चदव यऊने कालाश्चनूउनविाय
॥२२॥ वस्तुखापथयः स्वहा रससलाहमदाऊल॥२३॥

गहियकूस्यनत्साधनानांवापथ रुत्वानयकृः पूनूयानाधनंनसिद्धदिसागंश्च तमूयविहायाय यत्वनूयनहविषयादिमऊर्थ संग्रहदर्शयति। यदलपिनो। अ स्यतिविनाउनस्यमिनः गस्येवयकृतात्मन् नात्रीरुदं नास्यंतस्मनूयकृस्यस्
रावाह साधनानिनापर्थं॥२॥ नदाग पूर्सराचयूसांधयूसल्लु। पनूयावयवेः एतहसंराचा सरपा रुतिवडर्थनानयः। वनस्पतया पूपादवयऊनं यकृहमिः। रूदं चाविवनायद्वाईस्थानउपदिरः कथयातितिगम्यो॥ वहृउनलिलावसमादिपानलध
॥२२॥ वेरहतिपत्रादीनि डावधयाउीशूदयः सहसपाश्य। नसामनूवादयः सोवअदीनिसाहानिमदयो॥२३॥

॥२३॥ ।२४।२

वाउर्दर्जं हौत्रादिकं कर्मनिमाधयानि। अग्निहोमादीनि। सगव्दीनांमूकलान। मक्रत्रूतिहा सकामादयः। दवतानामनुक्रमउद्देशः कसौवी अयनादिकर्मपद्धतिग्रंथः। अननाह्यक रूतिसंकल्पः। तत्र मनूस्थान प्रकारः॥२४॥ गतयावि
कृत्वामाधाः। मतयादवताध्यानानि। रुतात्मरगवतिसमर्थनांसंरथाः संपादिताःसंरुभा यनसाहं गनेवयकृनेवा। अनेनयकृनयकृमयऊकिमिक्रार्थः स्वविन॥२५॥ गनदवा अयऊनलस्यार्थं सुवयकूं दर्शयति। नतरूतिः॥ द्वारवा॥

सवीयकृविधिमामानि वाउर्दर्जं चसत्कर्मो॥ नामधयानिमक्राय दक्षिणायत्रानिच। दवतानूक्रमः कल्पः संकल्पत्कुमवव॥२४॥ गतयामतायश्वेव प्रायश्चित्तंसमर्पणं॥ पनूयावयवे
वेतसंराभाः संरुतामया॥२५॥ रूतिसंरयासंराचः पूनूयावयवेवहं। तमवपूनूयंयकृ स्नेवा यऊमीश्वरं॥२६॥ तस्मिज्ञानन्रूम प्रऊनां पतयानव। अयऊनवकमयकं पूनूयंस्वसमाहिताः
॥२७॥ तत्त्वमन्यवकाल रू ऊिवसम्पया यव। पितवा विवूधादेवा मनूष्याः कलुरिविवुं॥२८॥ नारायणभगवति गदिदंविश्वमाहिता। गृहीतमायमनूज्जः सम्भदिवगुणः स्वाहा॥२९॥ ॥राम॥
यदंरू अदिनूपत अयवेंस्वाः अननपूनूवंऊ नमयाभूलस्याअदाहितः॥२७॥ कालस्वभावसन॥२८॥ यदधिष्ठानमित्यत सुञ्जलनार्थमूपसंहवति। नारायणरूतिसाहितं अधिष्ठितं। रुगवलहरुतुः यः स्वमायु
नः सर्गादौ गृहीतमायाययाः। उनवीउलः यनतस्मिन्॥२९॥ ॥राम॥राम॥ ॥रामरामराम॥ ॥रामराम॥ ॥रामराम वनिःसुन्न।

यत्सवत्तमित्यनन्तप्रत्यग्भूतत्वं यदुक्तं स एव भगवान् सर्वयोनिमम यच्च वक्ष्यतीति तद्व्यवस्यति। पश्यामीति यावन्न नैक स्वयमेव कथानीताहं। विश्वमिति पूर्वं पूर्वं यत् विश्वं रूपं न दिग्भिः किंभीयानीत्यनयानीति तथस्तु॥ २०॥ यद्वदेद विश्वं यदात्मक
प तत्त्वमित्येवमादि सर्वप्रश्नानां सामान्यात्मत्वं यदुक्तं वासुदेवात्मना ब्रह्मन् नवान्यार्थः स्थितत्वात् इति पूर्वस्यैव वदेत् सर्वमिति पूर्वस्यैव दृष्टीकृतां तद्व्यवस्यति॥ पश्यामीति॥ कार्यकारणात्मकं तावत् स एव भगवतः सकाशादन्यतः पृथ

पश्यामि तत्त्विमुक्ता हं ह्यात्मवत् तद्गगः विश्वं पूर्वं पूर्वं पर्यणं यतियाति त्रिगुणक्रियकं॥ २०॥ मुनिभिः शिष्टिताः यथेदमनु पश्यसि। नान्यद्भगवतः किञ्चिद् ज्ञातव्यं सदसदात्मकं॥ २१॥ नत्वात्मनीश्वरं
मयापलब्धं न वेद कश्चिन्मम नसा मयागतिः॥ न मे ह्यपीकाधिपात्सत्यासत्याथ यन्मत्स्वं तं श्रुतमा धनं॥ २२॥ सोऽहं समाम्नायमयस्तपोमयः प्रजापतीनामभिवन्दितः पतिः। आस्थाय योगं निपु
णं समाहितस्तत्राध्यगच्छं यत आत्मसंभवः॥ २३॥ २१

कुन एवानीयस्तितं॥ २१॥ यदुक्तं भगवतं यतो हि मा तम विज्ञाय मामीश्वरं प्रवृत्तोऽहि तद्व्यवधायावस्थं वदति। नत्वात्मनीति यदस्मात् मम यादोवेत्सणं न ज्ञातुं कः तद्गुणानस्याहविड्ताः अतः श्रीभगवान् अतः मदा पतन हृदि
यानं वहयः सत्यार्थः। ननु मत्त एव नत्वेति॥ २२॥ अयस्मात् नव भवाद्य व्यतिनेकात्यां धमादयति। तच्यां सोऽहं समाम्नायादि इति समाहितोऽपि योगमाश्रितोऽपि यातः आत्मनां ममसंभवो अन्यतमेव न ज्ञानवान् कृतान्यत्ववान्। प्र
नमर्दतो यस्तस्य यथाहं वेदवशात्॥ २३॥

भयक्तिः

तदायमी यूयमेव वर्णगतानां संसारनिवर्तकं। मंगलावहं सर्वेषां वासुदेव दीनामस्मिन् तनिदिविनं मम हि मवनन ज्ञनत्वानस्मीति। कौ मूलन्यायनाहं। माहीति स्वमायया विसृजं यः स्वयमपि पर्यमन्। पतिगद्धानिश्चये अनवाप्तीति नज्ञगवानि
त्यर्थः। अपरं च ज्ञानां ज्ञानी यूयं। तस्य च वदनतासीति पूर्ववदेवं वः। ननु सर्वज्ञः कथं न जानाति। उक्तवानवादि किंमित्यत्र न जानाति। यथा स्वस्यान्ते नरानाधाति। न हि स्वपूर्यादनि सार्वज्ञं विहन्ति धनिराज। तथा वदन्ति। अप नय प्रवर्तन यम्
चकमनन्तनयात्मपि यदनन्तानुनिवया ननु सावचनं भूतादि श्रुतिश्च यो यस्याध्यक्षः परमे व्योमन्। सा भगवद्‌यदिवान्वदति॥ ३४॥ जनन्तुर्यं वयपि नाहमिति जयर्थं वामदेवाद्‌भः यस्य जगतीगति यत्परमार्थं न तूर्यः

नाहं न यूयं यदृतां गतिं विदुर्न वामदेवः किमुतापरे सुराः।
तन्मायया मोहितबुद्धयस्त्विदं विनिर्मितं चात्मसमं विचक्ष्महे॥ ३५॥ यस्यावतारकर्माणि गायन्ति ह्यस्मदादयः। न यं विदन्ति तत्त्वेन तस्मै भगवते नमः॥ ३६॥ स एष आद्यः पुरुषः कल्पे कल्पे सृजत्यजः।
आत्मात्मन्यात्मनात्मानं स संयच्छति पाति च॥ ३७॥ भयक्तिः

किं विदन्ति पुरुषं तस्य मायाविनिर्मितां विश्वकर्तृविम। अदप्यात्मसमं स्वज्ञानादन्यमवनत्रुरुत्वं माहितबुद्धय इत्यर्थं तदज्ञानप्रपंचज्ञानचरतुः॥ ३५॥ ननु सर्वविज्जितैव कृच का दृश्यते गन्धात्मस्य यस्थिति॥ ३६॥ अवतारक
र्माणि संगदयावदर्गयिति। स एव आद्यो भगवान् यः पुरुषावतारः सन् सृष्ट्यादिकर्तांति। आत्मात्मन्यात्मनात्मानमिति कर्ता अधिकरणं साधनं कर्म च स्वयमेव सर्वथः पुरुषावतारैः सृष्ट्यादीनि कर्माणि करोतीत्यर्थः॥ २७॥

ऊर्ध्वं१

नयं विदन्ति तत्त्वेन प्रोक्तं किं तत्त्वमित्यपेक्षायामाह। ज्ञानं केवलं सत्यं तत्त्वं यदा याप्यावृत्तिज्ञानयच पदार्थविशेषभाति विशुद्धं विषयाभावशून्यं यतः प्रत्यक् सर्वान्तरं। अत एव सम्यक् संदेहादिनिर्मुक्तं अवस्थितं स्थिरं यतो निर्गुणं
गुणकार्यरहितं। गुणयोगिकभावे चलं भवति। यद्यपि वृत्तिज्ञानमपि स्वरूपज्ञानमेव भवति। तथापि चलादिदोषयुक्तं। तथा यत्क्वचन वृत्तिदोषैस्तथान्यास्वंतानि यवहितत्वात् अविभवविशेषयोः सत्त्वमिति समर्थितं। किंच यद्विकार

विशुद्धं केवलं ज्ञानं प्रत्यक् सम्यगवस्थितं। सत्यं पूर्णमनाद्यन्तं निर्गुणं नित्यमद्वयं॥३८॥ ऋषे विंदन्ति मुनयः प्रशान्तात्मेन्द्रियाशयाः। यदा तदेवासत्तर्कैस्तिरोधीयेत विप्लुतं॥३९॥

वत्। तदसत्यं दृष्टं नवास्य जन्माद्यस्य यद्विकाराः सन्तीत्यादि अनाद्यन्तं जन्मनाशरहितं। अत एव जन्मानन्तरास्तित्वलक्षणविविकारा नास्ति। वृद्धिविपरिणामापक्षयाद्यन्तं सन्ति यतः पूर्णं सर्वत्र सत्त्वात् नित्यमद्वयं।
नित्यं सर्वदा हेतोरतीतिसमर्थपि परमार्थतो द्वयमिति। ऋषे विदन्तरं वं प्रमाणयति। हन्त तावद प्रशान्तात्मेन्द्रियाशयाः प्रसन्नदेहेन्द्रियमनसा यदा भवति तदा विन्दन्ति। अन्यदा तदज्ञानकारणमाह। यदा तु तदेव प्रकाशमान
मवश्यमसत्तर्कैः विप्लुतं सत् तिरोधीयत इति॥ ॰ ॥३९॥

अवतारान् विभजन्नाह॥ आद्य इत्यादि यावत्समाप्तिः परस्य भूम्नः पुरुषः प्रकृतिप्रवर्त्तकः। यस्य सहस्रशीर्षत्वादि लीलाविग्रहः सृष्टा यावन्तः। वक्ष्यति हि सहस्रशीर्षादयः अदिनालसंस्थः पूर्वं विराड्विवरस्य तस्मिन्।
सोऽनन्तविष्णुः पुरुषात् आत्मन भवा परनारायण आदिदेवः॥ यथोक्तं विष्णोस्तु त्रीणि रूपाणि पुरुषाख्यान्यथो विदुः। प्रथमं महतः स्रष्टृ द्वितीयं त्वण्डसंस्थितं। तृतीयं सर्वभूतस्थं तानि ज्ञात्वा विमुच्यत इति। यद्यपि सर्वासामविशेष
अवतारत्वमुच्यते। तथापि कालश्च स्वभावश्च सदसदिति कार्यकारणात्मिका प्रकृतिश्च एताः शक्तयः। मनआदीनि कर्माणि उक्तानि दयागुणभवनादः। दृशा दयाविरूपायः। इति विवक्षया मनः महत्तत्त्वं द्रव्यं

आद्योऽवतारः पुरुषः परस्य कालः स्वभावः सदसन्मनश्च। द्रव्यं विकारो गुण इन्द्रियाणि विराट् स्वराट् स्थास्नु चरिष्णु भूम्नः॥४०॥ अहं भवो यज्ञ इमे प्रजेशा दक्षादयो ये भवदादयश्च। स्वर्लोकपालाः खगलोकपाला नृलोकपालास्तललोकपालाः॥४१॥ गन्धर्वविद्याधरचारणेशा ये यक्षरक्षोरगनागनाथाः। ये वा ऋषीणामृषभाः पितॄणां दैत्येन्द्रसिद्धेश्वरदानवेन्द्राः॥४२॥ अन्ये च ये प्रेतपिशाचभूतकूष्माण्डयादोमृगपक्ष्यधीशाः॥४३॥

महत्तत्त्वानि क्रमात् पुनर्विवक्षितः। विकारा अहंकारः गुणाः सत्त्वादि। विराट् समष्टिशरीरं स्वराट् वैराजः। स्थास्नु स्थावरं चरिष्णु जङ्गमं च व्यष्टिशरीरं॥४०॥ अहं ब्रह्मा रुद्रश्च भवः यज्ञो विष्णुः दक्षादयो ये प्रजेशाः तल
लोकपालाः पातालाधिपतयः॥४१॥ गन्धर्वादीनामधिपाः यक्षादीनामधिपाः रक्षोरगनागास्त्रिवर्गः। ऋषीणां पितृणां श्रेष्ठाः॥४२॥ प्रेतादीनामधीशाः॥४३॥ रामराम राम रामराम कोटिरामनाम फलमस्तु॥

किंबहुना यत्किंचिद्भगवदादि तत्सर्वं त्वमेव तदित्यन्वयः॥ भगवत् ऐश्वर्ययुक्तं महस्वत् तेजोयुक्तं ओजःसहसी इंद्रियमनःशक्तियुक्तं बलं दार्ढ्यं श्रीः शोभा ह्रीः कर्मजुगुप्सा। विभूतिः संपत् आत्मा बुद्धिः तद्युक्तं अद्भुत
वर्णः अद्भुतार्णं आश्चर्यवर्णमित्यर्थः। रूपमवत् रूपं रूपवत्। अरूपश्च। यद्वा सर्वं परं तत्त्वं तद्विभूतिरित्यर्थः॥४४॥ गुणावतारानुक्त्वा लीलावतारान्वक्तुमाह। प्राधान्यत इति। अस्त्वथ्यः श्रवणे कर्णयोः कषायाः मलाः तान्शोष

यत्किंच लोके भगवन्महस्वदोजः। सहस्वद्बलवत्क्षमावत्। श्रीह्रीविभूत्यात्मवदद्भुतार्णं तत्त्वं परं रूपवदस्वरूपं॥४४॥ प्राधान्यतो यानृष आमनंति लीलावतारान्पुरुषस्य भूम्नः॥
आपीयतां कर्णकषायशोषाननुक्रमिष्ये त इमान्सुपेशान्॥४५॥ ॥इति श्रीभागवते महापुराणे द्वितीयस्कंधे षष्ठोऽध्यायः॥ ॥ब्रह्मोवाच॥ यत्रोद्यतः क्षितितलोद्धरणाय बिभ्रत् २२
क्रौडीं तनुं सकलयज्ञमयीमनंतः। अंतर्महार्णव उपागतमादिदैत्यं तं दंष्ट्रयाद्रिमिव वज्रधरो ददार॥१॥ -१०००- ॥रामराम॥ ॥रामराम॥ रामराम॥

पयन्तीति प्राधान्यात् सुपेशान् सुन्दरान् सकलपापक्षयहेतून् अनुक्रमिष्ये। तदनुक्रमाः स्म त्वया पीयतामित्यर्थः। यद्वा अपीयतामिति छन्दः। आपिबतां कर्णकषायशोषानित्यर्थः॥४५॥ ·१७१०·॥
टीकायां द्वितीये षष्ठः॥ ॥सप्तमे भगवल्लीलावताराः सप्रयोजनाः। नानावतारकर्माणि प्रयोजनगुणैः सह॥ यत्र यदा क्षितितलोद्धरणार्थं वाराहीं तनुं बिभ्रत् उद्यतः अनंतः तदा तं सुप्रसिद्धं हिरण्याक्षं दंष्ट्रया ददार॥१॥ रामराम॥

यज्ञावतारमाह॥ रुचेः प्रजापतेः सकाशात् भार्यायामाकूत्यां जातः सन् सुयज्ञनामा जातः। स च स्वभार्यायां दक्षिणायां सुयमान् देवान् अजनयत्। स एव इन्द्रः सन् सुयामैः हि महत्। तदा पूर्वं सुयज्ञः स्वायंभुवेन मनुना आर्त्तिं
नाम नामहरन् हरिरित्युक्तः अनेन देवान्यादनं। लोकत्रयार्त्तिहरत्वेन इत्यस्य कर्म दर्शितं। एवं सर्वावताराणां कर्म वक्तव्यं॥२॥ कपिलावतारमाह॥ कर्दमस्य प्रजापतेर्गृहे देवहूत्यां देवहूत्यां जज्ञे नवभिः स्त्रीभिः भगिनीभिः सह
स च स्वमात्रे आत्मगतिं ब्रह्मविद्यां उक्तवान् यया आत्मगतया आत्मनः शमलं मलिनीकरणं गुणसंगरूपं पंकं अस्मिन्नेव जन्मनि विधूय कपिलस्य गतिं मुक्तिं प्राप्तवती॥३॥ दत्तात्रेयावतारमाह॥ मया अहमेव तुष्टेन दत्त इति। यथा अत्रेः

जातो रुचेरजनयत्सुयमान्सुयज्ञ आकूतिसूनुरमरानथ दक्षिणायां। लोकत्रयस्य महतीमहरद्यदार्त्तिं स्वायंभुवेन मनुना हरिरित्यनूक्तः॥२॥ जज्ञे च कर्दमगृहे द्विज देवहूत्यां स्त्रीभिः समं नव
भिरात्मगतिं स्वमात्रे। ऊचे ययात्मशमलं गुणसंगपंकमस्मिन्विधूय कपिलस्य गतिं प्रपेदे॥३॥ अत्रेरपत्यमभिकांक्षत आह तुष्टो दत्तो मयाहमिति यद्भगवान्स दत्तः। यत्पादपंकजपरागपवित्रदे
हा योगर्द्धिमापुरुभयीं यदुहैहयाद्याः॥४॥ तप्तं तपो विविधलोकसिसृक्षया मे आदौ सनात्स्वतपसः स चतुःसनोऽभूत्। प्राक्कल्पसंप्लवविनष्टमिहात्मतत्त्वं सम्यग्जगाद मुनयो यदचक्षतात्मन्॥५॥

ततः स तं आह दत्तोऽहं यत्पादपंकजरागेण अतैव विभूतिं दर्शयति। यत्पादपंकजपरागैः पवित्रदेहाः यदुहैहयाद्याः उभयीं ऐहिकीं आमुष्मिकीं च भुक्तिं मुक्तिं रूपां वा॥४॥ कुमारावतारमाह॥ मम मया आदौ यल्लोकसृष्ट्यर्थं तप्तं तपः तस्मात् स्व
तपसः महत्वसाधनात् सह चतुःसनाः सनत्कुमारः सनकः सनन्दनः सनातनः इति चत्वारः सन् समानं तपस्य सकथं न तस्मात् तपसः सनातन अग्रजाः। यद्वा स्वतपसः सनात् स्वतपसो दानात् समर्थनादित्यर्थः।
प्रभवत्॥ स च पूर्वकल्पस्य संप्लवे प्रलये विनष्टं आत्मतत्त्वं इहास्मिन्कल्पे सम्यक् जगाद उक्तवान् सम्यक्त्वं दर्शयति। येऽदितमात्मतत्त्वं मुनय आत्मनि अपश्यन्ति। प्रकर्षेण। साक्षादपश्यन्॥५॥ ० ॥

नारायणावतारमाह॥ धर्म्मस्य पत्न्यां दक्षदुहितरि मूर्त्तिसंज्ञायां नारायणो नर इति मूर्त्तिद्वयेन ऊत्पन्नः कथंभूतः स्वतपःप्रभावः स्वस्य तपसः प्रभावो यस्य। तदेवाह। अनङ्गस्य पृतना देव्यः अप्सरसः भगवतः सकाशात् आत्मनः स्वस्य प्रति नृपाश्च ऊर्द्ध्व
न्याशोर्द्धदृष्ट्वा तस्य नियमावलोपं कर्त्तुं भगवन्तं घटितुं साधयितुं न शेकुः। यद्वा आत्मनः स्वस्य या नियमे तपो नाशयन्तं नृपः तस्य लोपं न दृष्ट्वा भगवतः सङ्घटयितुं न शेकुरिति॥ भगवद्ध्याने मकरध्वजो विघ्नाति। यत्र कामविजयी क्रोधोपि
विघ्नाति। तत्र का मानकुरुवतोति किं वक्तव्यं कृत्स्नात् कामम् इति। कृतिनः धीरा रुद्रप्रमुखाः रोषयुक्तया दृष्ट्या कामं दहन्ति। अयं तु आत्मानं दहन्तमपि क्रोधं न दहन्ति। क्रोधेन हि स्वयं क्रुध्यत इत्यर्थः॥ ॥ननु एतत्सामर्थ्यमस्य यद

धर्म्मस्य दक्षदुहितर्य्यजनिष्ट मूर्त्यां नारायणो नर इति स्वतपःप्रभावः दृष्ट्वात्मनो भगवतो नियमावलोपं देव्यस्त्वनङ्गपृतना घटितुं न शेकुः॥६॥ कामं दहन्ति कृतिनो ननु रोषदृष्ट्या रोषं दह
न्तमुत ते न दहन्त्यसह्यं। सोयं यदन्तरमलं निविशन् बिभेति कामः कथं नु पुनरस्य मनः श्रयेत॥७॥ विद्धः सपत्न्युदितपत्रिभिरन्ति राज्ञो बालोपि सन्नुपगतस्तपसे वनानि। तस्मा प्रसन्नः ध्रुवगतिं गृणते प्रस
न्नो दिव्या स्तुवन्ति मुनयो यदुपर्य्यधस्तात्॥८॥ २८

स्तुत्वा त्वा

कर्त्तुं समर्थं प्रविशन्नलं बिभेति। यद्वा यस्यान्तः मनः कथं दूरतो भूमलं निर्मलं प्रविशन्निति॥७॥ ध्रुवावतारे वक्ष्यमाणं वर्णं सूचयति। मातुः सपत्न्या उदितानि उक्तानि वाक्यान्येव पत्रिणः बाणास्तैर्विद्धः ध्रुवः राज्ञः उत्तानपादस्य
अन्ति समीपे तपसे तपस्यां ध्रुवगतिं ध्रुवपदं दत्तवान् यदुपरि सप्तर्षयः अधस्तात् स्थिताः। दिवि दिव्याः स्तुवन्ति। यद्वा उपरिस्थिता भृग्वादयः अधः सप्तर्षयः स्तुवन्तीति॥८॥
नि

पृथुनाः

पृथ्ववतारमाह॥ यद्वेन। उत्पथगतं मार्गविरुद्धगामिनं अनर्थकं पुत्रमिति पदं नाम लेभे। पुन्नाम्नो नरकात् यस्मात् पितरं त्रायते स पुत्रः। तस्मात् पुत्र इति लोकः स्वयमेव स्वयं भवति। हि पुत्रपदं लभते। कथंभूतं द्विजानां अ
पवादमेव वज्रं तेन विप्लुष्टं दग्धं पौरुषं भगं ऐश्वर्य्यं च यस्य तं। चरितान्तरमाह। येनेव जगति जगदर्थं वसूनि च धनानि दुग्धानि॥९॥ ऋषभावतारमाह॥ नाभेरिति नाभेः भार्य्यायां सुदेव्यां सूनुः ऋषभ आस नाभेः हि भार्य्यायामनु
देव्या एव सुदेवी तत्पिरि जडवद्योगचर्यां निःसङ्गचर्यां चचार पारमहंस्यं पदम्। तत्र हेतुः समदृक्। तत्रापि हेतुः स्वस्थः स्वरूपस्थितः प्रशान्तकरणः प्रशान्तेन्द्रियः। तत्रापि हेतुः परिमुक्तसङ्गः॥१०॥ ॥हयग्रीवावतारमाह॥ सत्रेति। आत्मन्येवार्थं नीचे॥

द्विकर्म्मक।

यद्वेनमुत्पथगतं द्विजवाक्यवज्रविप्लुष्टपौरुषभगं निरये पतन्तं। त्रात्वार्थितो जगति पुत्रपदं च लेभे दुग्धा वसूनि वसुधा सकलानि येन॥९॥ नाभेरसावृषभ आस सुदेविसूनुर्यो वै चचार समदृक्
जडयोगचर्य्यां यत्पारमहंस्यमृषयः पदमामनन्ति स्वस्थः प्रशान्तकरणः परिमुक्तसङ्गः॥१०॥ सत्रे ममास भगवान् हयशीर्षकाथ साक्षात् स यज्ञपुरुषस्तपनीयवर्णः छन्दोमयो मखमयोऽखिल
देवतात्मा वाचो बभूवुरुशतीः श्वसतोस्य नस्तः॥११॥ मत्स्यो युगान्तसमये मनुनोपलब्धः क्षोणीमयो निखिलजीवनिकायकेतः विस्रंसितानुरुभये सलिले मुखान्मे आदाय तत्र विजहार ह वेदमार्गान्॥१२॥

स एव साक्षाद्भगवान् मम ब्रह्मणः सत्रे यज्ञे हयशीर्ष आस तपनीयं सुवर्णं तद्वद्वर्णो यस्य। छन्दोमयः वेदमयः तद्विधेयायामखात्मकत्वात् मखमयः अखिलदेवतात्मा इति वा पावनाः सर्वे यज्ञेन तं यो अखिला देवताः स्तुवन्ति अस्य श्वसतः
वाचः श्रुतयः नस्तः नासिकातः उशतीः उशत्यः कमनीया वेदलक्षणा वाचो बभूवुः॥११॥ मत्स्यावतारमाह॥ मत्स्य इति। युगान्तसमये मनुना दृष्टः क्षोणीमयः पृथ्व्याश्रयः। तदाश्रयत्वमेवाह। अत एव निखिलजीवनिकायानामाश्रयः
मम मुखात् विस्रंसितान् पतितान् वेदस्य मार्गान्। वेदानादाय युगान्ते सलिले विजहार हर्षेण॥१२॥

कूर्म्मावतारमाह॥ क्षीरोदधाविति॥ कच्छपवपुः सन्‌। अमृतार्थं मन्दरगिरिं पृष्ठेन विधृतवान्‌। कः कीदृक्‌ गलद्ध्वय क्षीराद्धिमन्थनं कुर्वतां सतां निद्रायाः क्षणः उत्सवो यस्य सः॥ निद्राक्षणत्वकारणमाह। अद्रेः परिव
र्त्तः परिभ्रमणं तेन कषाणः कषणं घर्षणं तेन सुखप्रदा या कण्डूः सा कण्डूर्यस्य सः। यद्वा अद्रिपरिवर्त्त एव कषणं कषाणं तेन अतिसुखप्रदा कण्डूर्यस्य॥१३॥ श्रीनृसिंहावतारमाह॥ त्रैपिष्टपा देवाः तेषामुरुभयं हन्तीति तथा
स भगवान्‌ अथवा त्रैपिष्टपा देवाः हिरण्यकशिपोर्वधकाले तथा मूर्त्तरूपं जनको रुसा यस्मिन्‌ तत्त्रैपिष्टपोरुभयहा स नृसिंहरूपं कृत्वा कथंभूतं भ्रमन्त्यौ भ्रुकुट्यौ दंष्ट्राश्च यस्मिन्‌ तत्करालं वक्त्रं यस्मिन्‌ तत्‌ दैत्येन्द्रं

क्षीरोदधावमरदानवयूथपानामुन्मथ्नताममृतलब्धय आदिदेवः। पृष्ठेन कच्छपवपुर्विदधार गोत्रं निद्राक्षणोऽद्रिपरिवर्त्तकषाणकण्डूः॥१३॥ त्रैपिष्टपोरुभयहा स नृसिंहरूपं कृत्वा भ्रम
द्भ्रुकुटिदंष्ट्रकरालवक्त्रं। दैत्येन्द्रमाशु गदयाभिपतन्तमाराद्‌ ऊरौ निपात्य विददार नखैः स्फुरन्तं॥१४॥ अन्तःसरस्युरुबलेन पदे गृहीतो ग्राहेण यूथपतिरम्बुजहस्त आर्त्तः। आहेदमादिपुरुषाखिललो २३
कनाथ तीर्थश्रवः श्रवणमङ्गलनामधेय॥१५॥ श्रुत्वा हरिस्तमरणार्थिनमप्रमेयश्चक्रायुधः पतगराजभुजाधिरूढः। चक्रेण नक्रवदनं विनिपाट्य तस्माद्धस्ते प्रगृह्य भगवान्‌ कृपयोज्जहार॥१६॥

पतन्तं आरात्‌ समीप एव गदया उपलक्षितं कुपितान्तं नखैर्विददार॥१४॥ हरिसंज्ञावतारमाह॥ अन्तरिति। उरुबलेन ग्राहेण यूथस्य पतिः तीर्थरूपं श्रवो यस्य। हे तीर्थश्रवः॥ श्रवणे एव मङ्गलं नामधेयं यस्य॥१५॥
तद्वचनं श्रुत्वा अरणार्थिनं शरणार्थिनं पतगराजस्य भुजयोरधिरूढः चक्रेण नक्रस्य वदनं विनिपाट्य विदार्य तस्मादुद्धृतवान्‌॥१६॥

वामनावतारमाह॥ अदितेः सुतानां द्वादशादित्यानां मध्ये अधियज्ञः यज्ञाधिष्ठाता विष्णुः अवरजः कनीयानपि गुणैर्ज्यायान्‌। अस्य गुणमेवाह॥ यद्यस्मात्‌ इमान्‌ लोकान्‌ विचक्रमे पादन्यासैराक्रान्तवान्‌। अथ प्रतिग्रहानन्तरमेव
तत्र हेतुः बलेः क्ष्मां वामनरूपेण जगृहे॥ नन्वीश्वरस्य यत्किमपि तथा चक्रे पाठोह॥ याच्ञां विना धर्ममार्गेण वर्त्तमानानवात्यः श्रेयस्यपि त्रिगणनीयः स्मृतिः॥ ननु तर्हि याच्ञैव किं पलनमनुचितमेव सा गर्वो नाग्निके सूक्ष्मालाका दिव
स्वामीत्यागमनकृतवानित्याह॥ नार्थ इति। यद्विबुधाधिपत्यं इदानीं बलाग्राय्य अप्रदीयमानं च अर्थं बलेः स्वार्थनिरवति। कथं स्तुता आह। आपः उरुक्रमस्य पादशौचं पुवर्णकालनरूपा अपः अस्य

ज्यायान्‌ गुणैरवरजोऽप्यदितेः सुतानां लोकान्‌ विचक्रम इमान्‌ यदथाधियज्ञः। क्ष्मां वामनेन जगृहे त्रिपदच्छलेन याच्ञामृते पथि चरन्‌ प्रभुभिर्न चाल्यः॥१७॥ नार्थो बलेरयमुरुक्रमपादशौच
मापः शिखाधृतवतो विबुधाधिपत्यं। यो वै प्रतिश्रुतमृते न चिकीर्षदन्यदात्मानमङ्ग मनसा हरयेऽभिमेने॥१८॥ तुभ्यं च नारद भृशं भगवान्‌ विवृद्धभावेन साधु परितुष्ट उवाच योगं। ज्ञानं च भागव
तमात्मसतत्त्वदीपं यद्वासुदेवशरणा विदुरञ्जसैव॥१९॥

शिखाधृतवतः ह। शिरसा धृतवतः विबुधाधिपत्यमपि नायमर्थः प्रतिश्रुतं विना अन्यत्‌ न चिकीर्षत्‌ कर्तुं नैच्छत्‌ यः तृतीयपादपूरणार्थं हरये आत्मानं देहमपि मनसा अभिमेने अङ्गीकृतवान्‌। एवं सद्रूपे लाघवप्रद
यादरुवाक्‌ विबुधाधिपत्यमनर्थं निरवति एव॥१८॥ हंसावतारमाह॥ तुभ्यमिति। हे नारद विवृद्धेन भावेन भक्त्या परितुष्टः सन्‌ हंसरूपी यागं साधु यथा भवति तथा उवाच। ज्ञानं च ज्ञानसाधनं। किं तत्‌ भागवतानाम। कथंभूतं
आत्मतत्त्वप्रकाशकं तदीयत्वं विदुः एवं नेति। यदित्यस्य फलमाह। यदिति॥१९॥

तत मन्त्रकनावना वमाह ॥ वज्रमिति ॥ स्वतत्रा नित्य प्रत्याव मवववज्रं स्नदग नैविराहि । वज्रावदयति हतं त्रया वैदिरर्नीयर्थः ॥ तदवाह ॥ मनूवंशपालकः सन तया नं लोकानां यक्षडयविरह्निता सत्य लोकपि । कमनीयास्त्व कीर्त्ति विस्तार
यन्तु ॥ नाजस्रदत्रु विधर ॥ श्ना ॥ धनन्त यविनानमाह ॥ लोक मुवनीर्य धनेकनिः सन, पूनूनूजं वागिनीं स्वनास्त्रैव नूऊः शागमनू इनि । स्वयमव कीर्त्तिविति कीर्त्तिति गयादिः । अस्मीमन्त्र नून्यमाम्यू यस्याप्तु सः अव अवसन्त्रे पूर्वदेशे ः
प्रतिवद्ध यज्ञरागी च मुवनूत्वे लरन्तं । स्वाय नूङ्गमिति पा० पयमवार्थः अायू त्रि यर्थ वदं वानूभाहि प्रवर्त्तयति ॥ २१ ॥ परन्तु नामावाता नमाह ॥ ऊगतः क्र्याय विविना देवन डयरत्नौ संवर्द्धितं म स्वद समर्थितामिति ना ॥ ब्राह्मण स्तो
वज्रं वदि ह्ववरतां दगम्नूखनाङा मत्वन्तन पू मनूवंगधना विरहि । इस्र युनाऊत्सू दमं वदधा त्वकीर्त्ति स स्पि ॥ पसडगती प्रथयंप्यवि प्रेथा ॥ २१ ॥ धन्त्र कवि प्त्रगवानु स्वयमवकीर्त्ति नो मान्तर्भूत नू
ऊा नूऊ प्नुत्त इनि । यज्ञ वरागमन्तानू वनाय नूङ्ग मायूप वदमनूभा त्ववाय लोक ॥ २२ ॥ कार्य कयायविप्तिना प्रत्यों महात्मा वृक्ष क्रुत्तिनपथं नवकार्तिति स्मू ः डङ्ग त्वसा ववनिर्धक्तमूत्रवी
र्य प्त्रिसयकृत्त डनूभवयमस्व क्षेन ॥ २३ ॥ अस्मनू प्रसाद स्तु मूखः कलयो कलेन ः स्त्रनूवंशभूवनीर्यगुप्तवृन्दितं । तिष्ठनूवने सदस्तिना नूऊाविवरा यस्मिन्नु विनूधा कम्र कलिमाहू नू ॥ २३ ॥ नाम ।
दूस्र गीति तथा । स्नतः ड त्रिनाः यं थवदमाल्येयन । स्नत्र वन न का हि लि समीति वा । प्रवंरत्तं अवनः कं फकुल्यं कार्य असोमहात्मा हविः डङ्गति डल्लाटयति । दार्घनी अम्बरः पनज्ञुना ॥ २४ ॥ नामवान नमाह ॥ त्रिति ः
अस्ल दिति । अस्मा कं ब्रह्मादीनां प्रसाद सूमूखः कलमा रत्नादि नूपयासह । कलामाया तस्या स्नेन गुप्ता इगवथस्य आश्रया तिष्ठन् सीताल स्मणाभ्यां सहिता वनमाविवेश । यस्मिन्नु विनार्थ कलावशलना गंप्रापः ॥ २३ ॥ ७ ॥ २६

सर्ग५

यस्मे नामाय उदधिस्मर्गि दरो ॥ सयदिश्च ग्रं हना यथ त्रिपूर्व दिधरुः ॥ तदनू अवनिपूर्व लीकां दग्रुमि स्राः वद्ध चतुर्थर्थं यद्धा यथमापं दिधकाः नामाय हर्यं प्रायं तना कमायस्येति । कथं हताः उदधिः ॥ तुरं प्रायं यहूर्य ततश्र
क्रमूवयः र्यकायस्य । अत्रहतुः हवन र्लमानास्ददत । सीता तया निमित्त लहनयो मथिताः कृतिना प्रायः तन स्तुणा ला सूर्य नूपादस्थि । तया स्वर्क तथमानं मकराला मूवगम नान काणं वज्रं यस्मिन् ॥ २४ ॥ किंच ॥ यूद्ध नाव तस्य नकर
लस्य । नितरू मारुम्भ यमहेन्द्र वाहस्य स्वेनावास्य दन्तोश्शो विडे क्रिनास्त्वधवलित्वा धवलीकृताः । तत्त्वदि रूपति ते ः प्रकाशिता नू त्वधत्ता यात्र दंस्त्रा ः कम्रता दिगः ता शत्रा स्वः पालयमीति तथास्य दानहर्तुः नावनस्य
यस्मा ज्ञ्पा दृदधिनू उरुयामवया मार्ग संपद्यविपूर्व हवव दिधकाः हरसद्रुत्र मथितवापस्र । गाता दृष्ट्वा तातप्यमानमकथारगनक्रचक्रः ॥ २४ ॥ वर्ध सूर्ले नू ग्रमहेन्द्र वाहदन्ते हितिं विनाकर
इयडुदहसं । सप्ता स्त्रुतिः सहविनयति दावहर्त्तृ विस्तु रूर्जे इन्द्रमुखडयवनाधिसेन्य ॥ ३० ॥ ॥ नामरूप ॥ नामरूप ॥ ॥ नामरूप ॥ ॥ नामरूप ॥ ॥ नामरूप ॥
ग्रहामत्समः काम्यामीति महागर्वेन नूर्दक्षायं हासं अस्तु रिः डाजो । सहसयः गीर्य विनयति प्यनयति के इन्नूथाविस्नूक्तिन्ते ः ८ ताव याये मवकथं हतस्य मूर्ष्निसेन्य स्वयम्से नेम व्य । डवूनाः डलर्षण विवव
नः कत्रू दूपनूर हासमिति पा०दं मे नू कलितानां कमलीऊयन । याकुडहसः सं ऊताागदं तमयनः यामीत्यर्थः ॥ २७ ॥ ॥ नामरूप ॥ ॥ नामरूप ॥ ॥ नामरूप ॥ ॥ नामरूप ॥ नाम ॥

श्रीकृष्णावतारमाह ॥ भूमेरिति ॥ सुरेतराः असुरास्तेषां वरूथैः सैन्यैर्विमर्दितायाः भूमेः क्लेशव्ययाय कलया नाम ननसरुजाताः सन् कोसो ज्ञातः सितकृष्णकेशो यस्य भगवतः स एव सा कला सितकृष्णकेशत्वं ज्ञ रेवा । नतु वयस्त्वेविश्रमरुणा । अविकविज्ञाना । यन्नुक्तं विष्णुपुराणे । उद्धृत्य आत्मनः केशौ सितकृष्णौ महामुन । इति । यद्वराना । सवायिकल्पे दवि वृन्दावर्ते उद्यमकमयदं वायिकृष्णो नो वाप्ति केशवयिणी यद्दृनां काल स्त्रियो नाति नीदव कीः । न्यान कावलरुद्रावरव यासो ध्वनरुस्य दवस्य कराः कृष्णद्वितीयः कगवः सेव रुव क । यासो वनूनः कृष्णडक इति । नन्दकेश मज्ञावमावा रित्राय । किंतु रुमावावत्नन्नूयं कार्यं किंयदनु । मत्केशवदनात्कार्ये नकाविति ज्ञा

भूमेः सुरेतरवरूथविमर्दितायाः क्लेशव्ययाय कलया सितकृष्णकेशः । जातः करिष्यति जनानुपलक्ष्यमार्गः कर्माणि चात्ममहिमोपनिबन्धनानि ॥ २६ ॥ तोकेन जीवहरणं यदुलूकिकायाः त्रैमासिकस्य २७
च पदा शकटोपवृत्तः । यद्रिंगतान्तरगतेन दिविस्पृशोर्वा उन्मूलनं त्वितरथार्जुनयोर्न भाव्यं ॥ २७ ॥ ॥ ॥

तनार्थं वा मरुपूर्वार्त्वर्जुनत्वनार्थं च कालं दृश्यते इति गम्यते । अन्यथा तत्रैव पूर्वापरविरोधः स्यात् ॥ भगवानस्वयमित्यादि शोभा ॥ कथं रक्षताः पत्रम ध्वनयाजनेः अनुपलक्ष्यमार्गः यस्य तदीय्वरत्वं क्रियमाणं । आत्ममा उपकर्माणि यथा नपयति नवरताह । आत्मनामहिमा उपनियथा अत्यद्भुता यथा तानि ॥ २६ ॥ एवं दवस्यैव यति । तोकेन बालेन । वा सतन्पूतना या जीवहरणं यत् । रिंगता जानुभ्यां गच्छता । अन्तरगतेन मध्ये वा यत् दिविस्पृशोः ॥ अस्य यः इतरथ अर्जुनयोस्तरुत्र विनाश्यं ॥ २७ ॥

विषतोयपीतान् विषमयमायस्य पीतं यानि ये तान् पालान् । गोपांश्च दृष्ट्या इति सुखवृष्ट्या जीवयिष्यति । यमुनायां कालियं उच्चाटयिष्यति ॥ तच्छुद्धये तस्याः शुद्धिर्यस्या तन्निर्विषत्वाय अतिविषस्य वीर्येण विलोला चंचला जिह्वा यस्य ॥ २८ ॥ दिव्यमलौकिकं । एव हि लोकादीः उन्नेष्यति उद्धरिष्यति । शुचिः ग्रीष्मः तस्मिन् वने गुल्मे अत्थेः । अनधिगम्या अप्रत्यर्का । अवसितानि क्षीणानि अन्तकालः यस्य तं । सबलः सरामः । अनधिगम्यं दुर्ज्ञेयं वीर्यं यस्य । तत्र निशि निःशयानमिति । कालियदमननाशाय यमुनातीरे नत्र विषायां विहितकाननिवेदि गोवने व्याप्तिमिति शुष्कर्म ॥ २९ ॥ उपबध्यतेनेन इत्युपबन्धं तत्साधनं शुल्बं दाम । अमुष्य माता यशोदा यद्यद्गृह्णाति अमुष्य नाम न तिवेधन

यद्वै व्रजे व्रजपशून् विषतोयपीतान् पालांस्त्वजीवयदनुग्रहदृष्टिवृष्ट्या । तच्छुद्धयेऽतिविषवीर्यविलोलजिह्वमुच्चाटयिष्यदुरगं विहरन् ह्रदिन्यां ॥ २८ ॥ तत्कर्म दिव्यमिव यन्निशि निःशयानं दावाग्निना
शुचिवने परिदह्यमाने । उन्नेष्यति व्रजमतोऽवसितान्तकालं नेत्रे पिधाप्य सबलोऽनधिगम्यवीर्यः ॥ २९ ॥ गृह्णीत यद्यदुपबन्धममुष्य माता शुल्बं सुतस्य न तु तत्तदमुष्य माति । यज्जृम्भतोऽस्य वदने भुवनानि गोपी
संवीक्ष्य शङ्कितमनाः प्रतिबोधितासीत् ॥ ३० ॥ नन्दं च मोक्ष्यति भयाद्वरुणस्य पाशाद्गोपान् बिलेषु पिहितान्मयसूनुना च । अह्न्यापृतं निशि शयानमतिश्रमेण लोकं विकुण्ठमुपनेष्यति गोकुलं स्म ॥ ३१ ॥

संमितं न रवति न पूर्यते इत्यर्थः । अपि च यशोदा संवीक्ष्य शङ्किता प्रतिबोधिता निजैश्वर्यज्ञापिता आसीदिति । यत्तु तत्कर्म दिव्यमेवेति सर्वत्र पूर्वेणैवान्वयः ॥ ३० ॥ वरुणस्य पाशात् भयाच्च मोक्ष्यति । मयसूनुना व्योमनाम्ना आपृतं व्यापृतं निशि शयानमिति वैकुण्ठं उपेत्य साधनानुष्ठानादेव यत्नेन उपनेष्यति प्रापयिष्यति । गोकुलवासिनं जनं स्म स्वलोकं ॥ ३१ ॥ ॥नामरुद्र॥ ॥नामरुद्र॥ ॥

दवःस्ष्ठु॥ पश्यन्तु विवस्त्रः विय द्विषु वि सर्थः॥ अनघ प्रमवहि गं उकस्मि देवकन सलीलं मथमहाध्र गोवर्द्धनं धर्तुमवयिष्यति। उद्भिन्नं ङ उद्धाकमिव सफलवर्णाशिखायस्य सधा॥२२॥ मिणिवातो निम्नदत्त्वनम्निः ऐरावणो यविवला
यां नन क्रीडनु कलाति मंडलानि पदानि य स्मिन तद्वनं। आयतो दीर्घ मध्ये हि गो आलाय विगमपयदूके गीतं गानं उद्यापितां स्मच एव नू कुर्यासां तासां गोपीनां रुठः गीत वृतस्य गीत वृतस्य विनाह विष्यति॥२३॥ यत्र पुलं वादयः तस्य दह
विलम्ह्वुलोन नदीयं निलयं अदर्शनं दर्शनीयाधे वेकुठ अलयस्यनी लूलं देभ वयः। खवाधनूकःद दुं वंगूव दद्दुं शावकः गूढः दवलयापी तः कविदिविदः कुञ्जानकः॥२४॥ यच माध अरुचाया समितिं समभम भालं गं

गायेम्मरव प्रीतिहा उउविप्लवाय दवः शिवर्थंतियःपूतु रूपायाचिकः ४ धर्लविति लिंधुमिव सय दिनानिसप वर्णमहा उ मनयेक कमस्सलीलं॥२५॥ क्रीडनवन निनिनिम्नकनवम्भि गेयर्थी यासान्तू
खः वलयपदायाम हितिन। उद्दीपितस्म नन् जां उउरुद्यूनां दर्लुर्हपियाति लिपाधनना नुगस्य॥२३॥ यत्र पुलं वरवदद्दुं नमध्यविर मज्ञरावं सयवना ४ उयौ उकाया यास्व च मन्त्र कपिवर्लं लदाव २८
कु सफालकणं वव विदूवथ नूनिमूख्या॥२५॥ यवामध समितिं मलिन आलाचाया। कास्वा उमस्य कूनूके कयसं ऊयाया। यस्य गपदर्णनमलं वलयाधर्हमि याउा कथनरुविनि निलयं नदीयं॥२७॥ राम॥
गयकक मिनिमलिना। ननू पुलं व खव कपि व ल्वल नू मि प्रमुखाथ वलरुद्रल निरा। काम्वा उादय गरीमा पूनादिषि गपव प्रद्युम्नन। यवनामूव कूल्वन मडुरु विलासप्राह। वहारी मः मूलादयः या उादयाः वययनाम
नि यस्य गंन। सफानास्त नयमिता कालाक नया स्पनी निराव। जतव सर्वमपि कर्म्मर्थ यमिव। तद्वान्यथ नराण्यमिति पूर्वं गोवसंव ध्यः॥२७॥ ॥

या सावता नमाह॥ अनुयूगमीलितासं कूविनाधीर्यथी। मकम त्यमाधूर्थ्यां तयां स्वनिगमः खकाः वदनानि वन। आह। स्वयपर्यं यस्यति। द्भूर्गंम गूलवमध्य सलवयामविर्भूताः॥ सनूस एव हवि ः विष्णवः नखानादन॥२७॥ वृद्धा
वनावनाह॥ देवक्रियांनि विहितानीति ताविहितानी नद्धलनवपूर्विः पूर्वाणिः अहन्य मूर्तिः अलङ्कव गतिमाविवीमाह ः मान्यत्वा गोपयस्मात् मता पुलीरुयया। अपूक्ताखीका वायस्मात्॥ नयाम उदयविश्मय गनडोयधर्म्म याम उधर्मय
नू वक्रताविष्यानसूर्थद्वा॥ ३॥ कल्लवनावमाह॥ यहि यदासता मथलय पुनः रूपद्रेयलिका। पावछुनः स्यूः नद्यानया उानःस्यूः गदा केक्षिन्नूपणे कलः गास्का र विष्यति॥२७॥ अत्रच उक्तनाचद संवादात् प्राग्नैविनीवनादयः॥
कालेन मीलितविद्यामवमध्य नृणं सकायूयां स्वनिगमा वाङ्मनया नः॥ अपि धहिता भनूयूगी सहिसल्ववर्णां वेदद्भूमविपणगा विरुडिष्यति सा॥२६॥ देव द्विषां निगमवर्त्म निनिष्ठितानां पूर्विर्मियनविहि
नाविव दन्यमूर्तिः॥ लोकानु घृणमतिविमाह मविपलारं वयं विधयवक्रलायां डोयधर्म्मं॥३०॥ यस्त्रलियचपिसनां नरुनः कथः स्यूः पाय उनाद्वि उउनावयलान्ध्वा ः स्वाराखक्ष वयति तिस्मनिषोनयत्र
गम सारुविष्यति कलर्गवानूयूगमकं॥३०॥ सन्नीताया रुमयथानवयप्रउण ः स्थानचधर्म मरवमन्वमना वनीणाः अन्तवधर्महूवमन्यूवस्मसूनाथा मायाविरुणयसूमा पूनूगफिराजः॥ ॥२९॥ ॥
वच्नलरावनावाम्बुरलमलविनश्च। भवलविपवस्था मोनदावलीतं। यी गमादयस्तु गयिनः॥ नयउकाविहनादि निर्द्दगः॥ कांदसपतिर्दुस्थं। स्वाधिकार्य्यायदन माया उपावत्ता रविभूती राह॥ सर्गेस्थिति। स्थानं स्थितौ मरवाविपूष्य
मंगमस्य मनवश्च भमनासवनीमश्च। अक्सद्धाव रुनानूः मन्यूवमाः स्याः वद्भूमकि यामि अरगवा सूमा विरचयः॥ २९॥

भा॰३

रूपं मयास्ते कथयतोऽपि विस्तरेण वक्तुं न कोपि समर्थ इत्याह॥ पृथिव्याः पांसवः तानपि यो विममे गणितवान् सोऽपि कोऽनु विष्णोर्वीर्यगणनां कर्तुमर्हति॥ कथंभूतस्य यो विष्णुः त्रिपिष्टपं सत्यलोकं चस्कम्भ स्तब्धवान्॥ किमिति यस्म् यस्मात् त्रिविक्रमे अस्खलिता प्रतिघातशून्येन स्वर्वेगेन सापादवेगेन त्रिसाम्यरूपं सदनमधिष्ठानं प्रधानं तस्मादावरणचक्रमपि कम्पमानं यस्मात्तदा॥ अतः कान्तमस्तकम् अपि स्तम्भितवान् इदं सत्यलोकं निध्यायय॥ सर्वं धृतवानित्यर्थः॥ तथा च मन्त्रः। विष्णोर्नु कमिति। अस्यार्थः। विष्णोर्नु वीर्याणि कं प्रवोचं कः प्राब्रवीदित्यर्थः। यः पार्थिवानि रजांसि विममे मसौ यो विष्णुः अस्कभायदुत्तरं सधस्थं त्रिविक्रमेण कृत्वा उत्तरं लोकं सत्यलोकं स्तम्भितवान्॥ ॥

विष्णोर्नु वीर्यगणनां कतमोऽर्हतीह यः पार्थिवान्यपि कविर्विममे रजांसि। चस्कम्भ यः स्वरंहसास्खलता त्रिपृष्ठं यस्मात् त्रिसाम्यसदनादुरुकम्पयानं॥४०॥ नान्तं विदाम्यहममी मुनयोऽग्रजास्ते मायाबलस्य पुरुषस्य कुतोऽपरे ये॥ गायन् गुणान् दशशताननआदिदेवः शेषोऽधुनापि समवस्यति नास्य पारं॥४१॥ येषां स एष भगवान् दययेदनन्तः सर्वात्मनाश्रितपदो यदि निर्व्यलीकं। ते दुस्तरामतितरन्ति च देवमायां नैषां ममाहमिति धीः श्वशृगालभक्ष्ये॥४२॥ ॥टीका॥ अवस्कम्भवान् कथंभूतः सर्वकं। सत्यसद्मनः इति पाठे तत्र सत्त्वैर्वेदं वेदसत्त्वं लोकमानमित्यर्थः॥४०॥ अतः स्वयं वर्णयति॥ नान्तमिति। पुरुषस्य मायाबलं तस्यान्तं न विदामि। न वयमपि। दशशतान्याननानि यस्य सोऽपि शेषः गुणान् गायन्नद्यापि न समवस्यति न समाप्नोति। यदि न कोऽपि विदन्ति तर्हि कथं मुच्यन्ते तत्राह॥ ॥येषामिति। दययेत्। दयां कुर्यात्। दययदिति कपदं आश्रितचरणास्ते भवन्ति तर्हि ते एतां देवमायां अतितरन्ति। एवमन्तमायां वेरं विदन्ति च। शृगालानां भक्ष्ये। प्रत्युत मृत्युमेव देहमायानत्वमित्याह। नैषामिति। श्वशृगालभक्ष्ये देहे॥४२॥ ॥रामकृष्ण॥ रामकृष्ण॥ ॥

२९

अपि ज्ञातारो वयमिति मयेत्यमिति ज्ञानं तद्वृत्तयश्च ज्ञानमस्तीत्याह॥ वेदाहमिति त्रिभिः। यूयमिति सनकादीनामग्रकत्वं बहुत्वं। दैत्यवर्यः प्रह्लादः मनुः स्वायम्भुवः तस्य पत्नी च तदात्मजाः पुत्राः कन्याश्च प्राचीनबर्हिर्ध्रुवादिसर्गस्त्रावश ऋभुनन्दनः अङ्गः वेनपिता॥४३॥ गाधिः नहुषः अनुपदस्तीत्वार्थः। रन्तिदेवा०। अमूर्त्तरयः एतत्संज्ञकः। देवव्रतो भीष्म इत्यर्थः॥४४॥ उपेन्द्रदत्तः शुकः। विभीषणादयो वर्या मुख्या यथायथं॥४५॥ किं बहुना सत्संगेन सर्वे विदन्तीत्याह तेवा इ

वेदाहमङ्ग परमस्य हि योगमायां यूयं भवश्च भगवानथ दैत्यवर्यः। पत्नी मनोः स च मनुश्च तदात्मजाश्च प्राचीनबर्हिरृभुरङ्ग उत ध्रुवश्च॥४३॥ इक्ष्वाकुरैलमुचुकुन्दविदेहगाधिरघ्वम्बरीषसगरा गयनाहुषाद्याः। मान्धात्रलर्कशतधन्वनुरन्तिदेवा देवव्रतो बलिरमूर्त्तरयो दिलीपः॥४४॥ सौभर्युतङ्कशिबिदेवलपिप्पलादसारस्वतोद्धवपराशरभूरिषेणाः। येऽन्ये विभीषणहनूमदुपेन्द्रदत्तपार्थार्ष्टिषेणविदुरश्रुतदेववर्याः॥४५॥ ते वै विदन्त्यतितरन्ति च देवमायां स्त्रीशूद्रहूणशबरा अपि पापजीवाः। यद्यद्भुतक्रमपरायणशीलशिक्षास्तिर्यग्जना अपि किमु श्रुतधारणा ये॥४६॥ ॥

ति॥ अद्भुताः क्रमाः पादन्यासा यस्य तस्य परायणं शरणं तेषां शीलं शिक्षा येषां ते यदि भवन्ति तर्हि तेऽपि विदन्तीत्यर्थः। श्रुतधारणा ब्राह्मणास्तु देवमायां विदन्तीति किं वक्तव्यं गुरुलघुः। भगवतानुष्ठ भावनामन्तो नियमेन ये धीनविदन्तीति किमु वक्तव्यं॥४६॥ ॥

किं तद्भगवतः स्वरूपं यस्मिन्मनो भावनीयमित्यपेक्षायामाह॥ शश्वदिति द्वाभ्यां॥ यद्ब्रह्मेति विदुर्मुनयस्तद्वै भगवतः स्वरूपं। किं तद्ब्रह्म तदाह॥ अजस्रं नित्यं च तत्सुखं च विशोकं चेति अजस्रसुखत्वे हेतुः॥ शश्वत्
सदा प्रशान्तं अशान्ति स्वस्वरूपं विशोकत्वे हेतुः॥ अभयं ततः यतः समं इदमन्यं। अन्यतो भयं। द्वितीयाद्वै भयं भवतीति श्रुतेः॥ ततः। यतः प्रतिबोधमात्रं ज्ञानैकरसं। ननु ज्ञानस्यापि नीलपीताद्याकारेण बहुत्वादि कथमेकरसत्वं
तदाहेत्याह। नेत्युक्तं निर्मलं। ननु दर्शितं विषयकत्वेन पदार्थानां मलः श्रुतत्वात्। सदसतः परं। विषयकत्वेनासंगत्वं। बृहत्त्वेन तदुपपत्तेः। न ज्ञानस्य निरंशत्वात्॥ ननु तथापि ज्ञाता सदसद्रूपः स्यात्। न। आत्मतत्त्वं आत्मनस्तत्त्व
स्वरूपं भवतात् न तत्राभिन्नं। ननु वस्तुतोऽपि निर्विशेषं इदं प्रपञ्चे स्वामीत्येव प्राचीनाः प्राणाद्यधस्वरूपत्वं तदाह। शब्द इति। ज्ञानादीनि विकल्पवशगस्य व्यापाराः नात्राभिमुखे इत्यर्थः॥ ननु परत्वं वस्तुनां भिन्नं न सत्त्वं ज्ञानरूपत्वात्। वि
भक्तत्वं। स्वस्य एव नानाकारकसाध्यक्रियाफलत्वात्। कथमजस्रसुखत्वं तत्राह॥ यत्र पुरुकारकसाध्यक्रियार्थः ज्ञानादि वस्तुविशेषः। ज्ञानाद्युपचारार्थं संलापाचोदितक्रियाफलवत्वं नास्ति। अतिरिक्ता मायापि अभिमुखे विवश्यापि ३०
॥शश्वत्प्रशान्तमभयं प्रतिबोधमात्रं शुद्धं समं सदसतः परमात्मतत्त्वं। शब्दो न यत्र पुरुकारकवान्क्रियार्थो मायापरैत्यभिमुखे च विलज्जमाना॥४७॥ तद्वै पदं भगवतः परमस्य पुंसो ब्रह्मेति यद्विदुरजस्र
सुखं विशोकं॥ सध्र्यङ्नियम्य यतयो यमकर्तहेतिं जह्युः स्वराडिव निपानखनित्रमिन्द्रः॥४८॥ ॥३१ टीका॥ शब्दो न यत्रेति। किमतः क्रियमाणा साधकमिति भावः॥ ननु तस्य आत्मत्वेऽपि मायामलापाकरणेन वि
कार्यत्वं स्यादेव व्रीहीणामिव तुषापाकरणेनेत्याशंक्याह। माया अभिमुखे स्थातुं विलज्जमानैव यस्मात्परैति दूरतोऽपसरति॥४७॥ तस्माद्वै तत्र भगवति नियमितमनसां कृतार्थानां न किमपि कर्तव्यमस्तीत्याह। सध्र्यङ्ङिति स
